सुभाषित व्याकरण - २२
Subhāṣita Vyākaraṇa - 22

(A compilation of Saṃskṛta well said verses with full grammar and meaning)

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

बुधवार, भाद्रपद कृष्ण एकादशी १९४४, शुभकृत संवत्सर

तावज्जितेन्द्रियो न स्याद् विजितान्येन्द्रियः पुमान् ।
न जयेद् रसनं यावज्जितं सर्वं जिते रसे ॥१॥ -श्रीमद्भागवत- ११.८.२१, -वैदिकवाङ्मयम् संघ

विजित-अन्येन्द्रियः पुमान्, यावत् (सः) रसनम् न जयेत्, तावत् (सः) जितेन्द्रियः न स्यात्।

जिते रसे, सर्वम् जितम् (इव भवति) ॥

A person controlling other sensory organs except his tongue does not control his all senses. Once, he achieves control over the tongue, everything else is conquered.

जितेन्द्रियः- one who has conquered all organs of sense- जितम्- conquered, won over- जित- क. भू. धा. वि. of जि- जयति १ ग. प. प. to win, conquer, defeat, इन्द्रियम्- an organ of sense- (पञ्चज्ञानेन्द्रियाणि- श्रोत्रं, त्वक्चक्षुषी जिह्वा तथा नासिका, तथा पञ्चकर्मेन्द्रियाणि- पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता)- जितानि इन्द्रियाणि येन सः- जितेन्द्रियः- बहुव्रीही स., विजितान्येन्द्रियः- one who has conquered all other organs of sense- विजित- well-conquered- क. भू. धा. वि. of वि+ जि- see above, अन्यत्- other, another, अन्यत् इन्द्रियम्- अन्येन्द्रियम्- विजितानि अन्येन्द्रियाणि येन सः- विजितान्येन्द्रियः- बहुव्रीही स. पुमान् (पुंस्)- man, human- all in पु. लिं. प्र. वि. ए. व., स्यात् & जयेत्- both विध्यर्थ प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist & जि- जयति १ ग. प. प. to conquer, win, रसनम्- organ of taste, taste- in न. लिं. द्वि. वि. ए. व., जिते & रसे- both in स्त्री. लिं. स. वि. ए. व. जिता (जित)- (see above) won & रसा- tongue, सर्वम्- all, entire & जितम्- (see above) won- both in न. लिं. प्र. वि. ए. व., तावत्- till that time, then, यावत्- till which time, until, न- no, not-all अव्ययs

सुसिद्धमौषधं धर्मं गृहच्छिद्रं च मैथुनम्।
कुभुक्तं कुश्रुतं चैव मतिमान्न प्रकाशयेत्॥२॥ -चाणक्यनीतिदर्पण-१४.१७,-वैदिकवाङ्मयम् संघ

मतिमान् (नरः) सुसिद्धम् औषधम्, धर्मम्, गृहच्छिद्रम्, मैथुनम्, कुभुक्तम् (अन्नम्) च कुश्रुतम् (निन्दितवचनम्) च एव न प्रकाशयेत्॥

A wise or an intelligent person should not disclose to anyone, his well-proven medicine, his right codes of conduct (Dharma), faults or weakness of his household, his sexual acts, miserable food that he has eaten and also degraded news or ugly talks heard by him.

(It does not make sense why would Chanakya recommend not disclosing one's proven medicine or his Dharma! May be he means indirectly not to disclose his ill-healthand his controvercial views?)

मतिमान्- पु. लिं. प्र. वि. ए. व. of मतिमत्- an intelligent, wise, understanding, sensible person- मतिः- wisdom, mind, thought & मत्- suffix implies quality, possession, सुसिद्धम्- well prepared, well proved- सिद्ध- क. भू. धा. वि. of सिध्- सिध्यति ४ ग. प. प. to accomplish, attain, to be proved, औषधम्- medicine, herb, गृहच्छिद्रम्- household weakness, shortcoming- गृहम्- house home, छिद्रम्- defect, flaw, blemish, weak point- गृहस्य छिद्रम्- गृहच्छिद्रम्- ष. तत्पुरुष स., मैथुनम्- sexual act, compilation, कुभुक्तम्- bad food eaten- भुक्त- क. भू. धा. वि. of भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to eat, enjoy, possess- कु- अव्यय- a prefix implies bad, miserable, little- कुत्सितम् भुक्तम्- कुभुक्तम् & कुश्रुतम्- degraded news or ugly talks heard- श्रुत- क. भू. धा. वि. of श्रु- शृणोति ५ ग. प. प. to hear, learn, study- कुत्सितम् श्रुतम्- कुश्रुतम्- both समा. प्रादित्पुरुष स.- all in न. लिं. द्वि. वि. ए. व., धर्मम्- in पु. लिं. द्वि. वि. ए. व. of धर्मः- accepted codes of conduct, duty- (Dharma),प्रकाशयेत्-

प्रयोजक विध्यर्थ प्र. पु. ए. व. of प्र+ काश्- to reveal, display, disclose- (काश्- काशते, काश्यते १, ४ ग. आ. प. to shine, look brilliant, beautiful), च- and, एव- just merely, only, न- no, not- all अव्ययs

हंसो न भाति बलिभोजनवृन्दमध्ये,गोमायुमण्डलगतो न विभाति सिंहः।
जात्यो न भाति तुरगः खरयूथमध्ये, विद्वान्न भाति पुरुषेषु निरक्षरेषु॥३॥---सुभाषितरत्नभाण्डागारम्-९६४,-

बलिभोजनवृन्दमध्ये हंसः न भाति, गोमायुमण्डलगतः सिंहः न विभाति, जात्यः तुरगः खरयूथमध्ये न भाति, निरक्षरेषु पुरुषेषु विद्वान् न भाति॥

A swan does not look nice amidst group of crows. A lion does not shine within flock of jackals. A well-bred horse does not shine among a herd of donkeys. A learned person is not appreciated among ignorant people.

बलिभोजनवृन्दमध्ये- amidst group of crows & खरयूथमध्ये- amidst group of donkeys- स. वि. ए. व. of बलिभोजनवृन्दमध्यः- (बलिः- an oblation, food offered to God or Dead person- भोजन- food, eating- वृन्दः- group मध्यः-adjctv- middle- बलिम् भुंक्ते इति- बलिभोजनः- a crow- उपपद तत्पुरुष स., बलिभोजनानाम् वृन्दः- बलिभोजनवृन्दः & बलिभोजनवृन्दस्य मध्ये- बलिभोजनवृन्दमध्ये- both ष. तत्पुरुष स) & खरयूथमध्यः (खरः- an ass, donkey, यूथम्- herd, flock, large group- खराणाम् यूथम्- खरयूथम् & खरयूथस्य मध्ये- खरयूथमध्ये- both ष. तत्पुरुष स), हंसः- swan, गोमायुमण्डलगतः- within flock of jackals- गोमायुः- a jackal, मण्डलम्- group, collection, assemblage, गतः- gone- (गत- कभू. धा. वि. of गम्- गच्छति १ ग. प. प. to go- गोमायोः मण्डलम्- ष. तत्पुरुष स & गोमायुमण्डले गतः- स. तत्पुरुष स.), सिंहः- lion, जात्यः- one born in noble or good family, one which is majestic, तुरगः- a horse & विद्वान् (विद्वस्)- a learned man, wise man, knowledgeable person- all in पु. लिं. प्र. वि. ए. व., निरक्षरेषु & पुरुषेषु- both in पु. लिं. स. वि. ब. व. of निरक्षरः- unlettered, uneducated- अक्षरम्- a letter, alphabet- निर्गतम् अक्षरम् यस्मात् सः- बहुव्रीही स. & पुरुषः- man, person, विभाति & भाति- both वर्त. प्र. पु. ए. व. of वि+ भा- to look brilliant, shine & भा- to look nice- (भा- भाति- २ ग. प. प.) न- no, not-अव्यय

द्वेषः कस्य न दोषाय प्रीतिः कस्य न भूतये ।
दर्पः कस्य न पाताय नोन्नत्यै कस्य नम्रता ॥४॥ -क्षेमेन्द्र- दर्पदलनम्-१.३२, -वैदिकवाङ्मयम् संघ

द्वेषः कस्य दोषाय न (नीयते)? प्रीतिः कस्य भूतये न (नीयते)? दर्पः कस्य न पाताय (नीयते)? नम्रता कस्य न उन्नत्यै (नीयते) ?

Whose hatred does not (lead) to (his) blemish (behaviour)? Whose love does not (lead) to (his) happiness? Whose arrogance does not (lead) to his downfall? Whose humility does not lead to (his) success?

द्वेषः- hatred, ill-will, disliking & दर्पः- arrogance, haughtiness- both in पु. लिं. प्र. वि. ए. व., प्रीतिः- love, affection, fondness & नम्रता- obedience, humility, humbleness- both in स्त्री. लिं. प्र. वि. ए. व., कस्य- whose- in पु. लिं. ष. वि. ए. व. of किम्- who, दोषाय & पाताय- both in पु. लिं. च. वि. ए. व. of दोषः- fault, blame, blemish, censure & पातः- downfall, destruction, भूतये & उन्नत्यै- both in स्त्री. लिं. च. वि. ए. व. of भूतिः- success, happiness, prosperity & उन्नतिः - rise, progress, elevation- (उन्नत- क. भू. धा. वि. of उद्+ नम्- नमति- ते १ ग. उ. प. to rise, spring up), न- no, not- अव्यय

हितं यत् सर्वभूतानाम् आत्मनश्च सुखावहम्।
तत् कुर्यादीश्वरे ह्येतत् मूलं सर्वार्थसिद्धये ॥५॥ - महाभा, उद्योगपर्व ३७.४०, -वैदिकवाङ्मयम् संघ

यत् सर्वभूतानाम् हितम् (अस्ति) आत्मनः च (अपि) सुखावहम् (भवति), तत् ईश्वरे कुर्यात्। एतत् हि सर्वार्थसिद्धये मूलम् (भवति) ॥

Any action, beneficial to entire living-beings and gives happiness to oneself, should be done as if it is in the service of God. This indeed is fundamental basis for achievement of all-round success.

यद्- which, what, तद्- that, it, एतद्- this, it, हितम्- beneficial, helpful, fit, proper, advantageous- (हित- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, please, promote), मूलम्- root-cause, basis, prime reason & सुखावहम्- one that brings happiness- सुखम्- happiness, satisfaction- सुखम् आवहति इति- सुखावहम्- उपपद तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., सर्वभूतानाम्- in पु/न. लिं. ष. वि. ब. व. of सर्वभूतः/भूतम्- all living beings- सर्व-pronominal adjctv- entire, all, whole, भूतः/भूतम्- living being- वि. पू. प. कर्मधारय स., आत्मनः- in पु. लिं. ष. वि. ए. व. of आत्मन्- self, one's own, soul, ईश्वरे- in पु. लिं. स. वि. ए. व. of ईश्वरः- God, Master, the Supreme, कुर्यात्- प. प. विध्यर्थ प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, सर्वार्थसिद्धये- in स्त्री. लिं. च. वि. ए. व. of सर्वार्थसिद्धिः- fulfillment of all ambitions, all-round achievement, अर्थः- purpose, meaning, aim, सिद्धिः- fulfillment, achievement- सर्वः अर्थः- सर्वार्थः- वि. पू. प. कर्मधारय स. & सर्वार्थाणाम् सिद्धिः- सर्वार्थसिद्धिः- ष. तत्पुरुष स., च- and, हि- indeed, surely- both अव्ययs

सुखं दुःखान्तमालस्यं दाक्ष्यं दुःखं सुखोदयम्।
भूतिः श्रीर्ह्रीर्धृतिः कीर्तिर्दक्षे वसति नालसे॥६॥ -महाभा शान्तिपर्व २७.३०, -संस्कृतसाहित्यमसमः संघः

आलस्यम् सुखम् (किन्तु) दुःखान्तम् (अस्ति)। दाक्ष्यम् दुःखम् (किन्तु) सुखोदयम् (अस्ति)। दक्षे भूतिः, श्रीः, ह्रीः, धृतिः(तथा) कीर्तिः वसति, न अलसे (वसति) ॥

Laziness is enjoyable in the beginning but it ends in a misery. Being active is strenuous but it is harbinger of happiness. Success, wealth, modesty, firmness and fame reside in being skillful and active and not in laziness.

सुखम्- happiness, satisfaction, joy, दुःखम्- sorrow, misery, दुःखान्तम्- one that is ending with sorrow- अन्तम्- end, conclusion- दुःखस्य अन्तं - षष्ठी तत्पुरुष स., आलस्यम्- laziness, inactivity, idleness, दाक्ष्यम्- fitness, cleverness, skill, dexterity, alertness, सुखोदयम्- one that is paving way for happiness- उदयम्- rise, advancement, production- सुखस्य उदयम् षष्ठी तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., भूतिः- prosperity, success, श्रीः- wealth, money, richness, ह्रीः- modesty, shame, धृतिः- steadiness, firmness, contentment, कीर्तिः- fame, renown, glory- all in स्त्री. लिं. प्र. वि. ए. व., दक्षे & अलसे- both in पु. लिं. स. वि. ए. व. of दक्षः- able, competent, skillful, fit, suitable & अलसः- lazy, inactive, वसति- resides- वर्त. प्र. पु. ए. व. of वस्- १ ग. प. प. to dwell, inhabit, reside, न- no, not- अव्यय

अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम्॥७॥- महाभा उद्योगपर्व ३९.४२, -सुधर्मादिनपत्रिका

विनयः अकीर्तिम् हन्ति, पराक्रमः अनर्थम् हन्ति, क्षमा क्रोधम् नित्यम् हन्ति (तथा) आचारः अलक्षणम् हन्ति ।

A polite conduct overcomes any (past) bad name. Courage avoids any (future) mishap. Forgiveness always destroys anger. Good conduct strikes out bad happening.

विनयः- polite conduct, modesty, humility, पराक्रमः- heroism, courage valour, bravery & आचारः- good conduct, behaviour- all in पु. लिं. प्र. वि. ए. व., अकीर्तिम्- in स्त्री. लिं. द्वि. वि. ए. व. of अकीर्तिः- disgrace, bad name, infamy- कीर्तिः- fame, glory, renown- न कीर्तिः- अकीर्ति- नञ् तत्पुरुष स., क्षमा- patience, forgiveness, forbearance- in स्त्री. लिं. प्र. वि. ए. व., अनर्थम्, क्रोधम् & अलक्षणम्- all in पु. लिं. द्वि. वि. ए. व. of हन्ति- वर्त. प्र. पु. ए. व. of हन्- २ ग. प. प. to strike, destroy, kill, अनर्थः- mishap, calamity, misfortune, unhappiness- अर्थः- meaning, purpose, wealth, object- न अर्थः- अनर्थः- नञ् तत्पुरुष स., क्रोधः- anger, wrath & अलक्षणः- bad or inauspicious sign- लक्षणः- good sign, an attribute, quality- न लक्षणः- अलक्षणः- नञ् तत्पुरुष स., नित्यम्- always, every time- अव्यय

न चात्मनो गुणांस्तात प्रवदन्ति मनीषिणः ।
परेणोक्ता गुणा गौण्यं यान्ति वेदार्थसम्मिताः ॥८॥ -हरिवंशपुराण २.२३.८, -वैदिकवाङ्मयम् संघ

तात, मनीषिणः आत्मनः गुणान् न प्रवदन्ति। परेण उक्ताः च गुणाः गौण्यम् यान्ति ।(तथा मनीषिणः) वेदार्थसम्मिताः (सन्ति)॥

Oh, my dear, the learned men never boast their own virtues. However, their qualities, well spoken by others, become very much valued. The learned men are followers of the scriptures.

तात- a term of affection or pity usually to inferiors: my son, dear- in पु. लिं. सं वि. ए. व., मनीषिणः- in पु. लिं. प्र. वि. ब. व. of मनीषिन्- wise, learned, intelligent, आत्मनः- in पु. लिं. ष. वि. ए. व. of आत्मन्- self, oneself, one's own, गुणान्- in पु. लिं. द्वि. वि. ब. व. of गुणः- virtue, quality, उक्ताः, गुणाः & वेदार्थसम्मिताः- all in पु. लिं. प्र. वि. ब. व. of उक्तः- said, mentioned, spoken- (उक्त- क. भू. धा. वि. of वच्- वक्ति २ ग. प. प. to say, talk), गुणः- (see above), वेदार्थसम्मितः- commensurate with objectives of the scriptures- वेदः-Veda, sacred knowledge, scripture, अर्थः- object, meaning, purpose, सम्मित- corresponding to, meted, commensurate with- (क. भू. धा. वि. of सं+ मा- to be commensurate with, equal to, agreeable to- (मा- माति to measure, limit)- वेदस्य अर्थः- वेदार्थः- ष. तत्पुरुष स. & वेदार्थेषु सम्मितः- वेदार्थसम्मितः- स. तत्पुरुष स., परेण- in पु. लिं. तृ. वि. ए. व. of परः- the other, another, गौण्यम्- one that is enumerable, attributable, valued, worth considering- in न. लिं. द्वि. ए. व., प्रवदन्ति & यान्ति- वर्त. प्र. पु. ब. व. of प्र+ वद्- to proclaim, declare- (वद्- वदति १ ग. प. प. to say, speak) & या- याति- २ ग. प. प. to go, become, happen, न- no, not, च- and- both अव्ययs

अभ्यासेन कटुद्रव्यं भवत्यभिमतं मुने।
अन्यस्मै रोचते निम्बः तु अन्यस्मै मधु रोचते ॥९॥ -योगवासिष्ठ- ६.२.६७.२८, -वैदिकवाङ्मयम् संघ

(हे) मुने, कटुद्रव्यम् अभ्यासेन अभिमतम् भवति। अन्यस्मै निम्बः रोचते तु अन्यस्मै मधु रोचते॥

Oh Sage, by constant use, even a bitter substance becomes agreeable to a person. While one likes taste of bitter Neem, someone else prefers to have just the honey.

मुने- पु. लिं. सं. वि. ए. व. of मुनिः- a sage, holy man, saint, ascetic, कटुद्रव्यम्- a bitter substance- कटु- adjctv- bitter, pungent, unpleasant, द्रव्यम्- substance, matter, object- वि. पू. प. कर्मधारय स., अभिमतम्- agreeable, desired, dear- अभिमत- क. भू. धा. वि. of अभि+ मन्- to desire for, wish for- (मन्- मन्यते, मनुते ४ & ८ ग. आ. प. to think, believe) & मधु- honey, anything sweet- all in न. लिं. प्र. वि. ए. व., निम्बः- Neem- a tree with bitter leaves and fruits- in पु. लिं. प्र. वि. ए. व., अभ्यासेन- in पु. लिं. तृ. वि. ए. व. of अभ्यासः- practice, repeated use, habit भवति & रोचते- both in वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, to become & रुच्- १ ग. आ. प. to fancy, like, to be pleased with, अन्यस्मै- in पु. लिं. च. वि. ए. व. of अन्यत्- the other, another, तु- but, on the other hand- अव्यय

यच्चिन्तितं तदिह दूरतरं प्रयाति
यच्चेतसापि न कृतं तदिहाभ्युपैति।
इत्थं विधेर्विधिविपर्ययमाकलय्य
सन्तः सदा सुरसरित्तटमाश्रयन्ति॥१०॥ -वैदिकवाङ्मयम् संघ

इह यद् चिन्तितम्, तद् दूरतरम् प्रयाति। यद् इह चेतसा अपि न कृतम् तद् अभ्युपैति। सन्तः, इत्थम् विधेः विधि- विपर्ययम् आकलय्य, सदा सुरसरित्तटम् आश्रयन्ति॥

In this world, whatever one thinks about moves farther and farther away! Anything that was never even imagined arrives quickly. Wise people, fully understanding this contradictory destiny, always retire to the banks of the holy river Ganga.

यद्- which, what, तद्- that, it, चिन्तितम्- thought of, wished for, reflected- चिन्तित- क. भू. धा. वि. of चिन्त्- चिन्तयति- ते १० ग. उ. प. to think of, have an idea of, दूरतरम्- farther away- दूर- adjctv- far off, at long way & तरम्- a suffix implies comparative degree & कृतम्- done, made- कृत- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do- all in न. लिं. प्र. वि. ए. व., प्रयाति & अभ्युपैति- वर्त. प्र. पु. ए. व. of प्र+ या- to move, go away- (या- याति २ ग. प. प. to go, walk, move) & अभ्युप+ इ- to arrive, approach, to come near- (इ- एति २ ग. प. प. to go, to come to), चेतसा- in न. लिं. तृ. वि. ए. व. of चेतस्- consciousness, the mind, heart, विधिविपर्ययम् & सुरसरित्तटम्- both in पु. लिं. द्वि. वि. ए. व. of विधिविपर्ययः- contrariety of destiny, fate- विधिः- destiny, fate, luck, विपर्ययः- contrariety, reverse action- विधेः विपर्ययः- विधिविपर्ययः- ष. तत्पुरुष स. & सुरसरित्तटः- banks of holy river Ganga- सुरः- पु. लिं- God, सरित्- स्त्री. लिं.- river & तटः- banks- सुराणां सरित्- सुरसरित् & सुरसरितः तटः- सुरसरित्तटः- both ष. तत्पुरुष स., विधेः- पु. लिं. ष. वि. ए. व. of विधिः- (see above), सन्तः- in पु. लिं. प्र. वि. ब. व. of सत्- noble or saintly person, आकलय्य- after understanding, knowing- पू. का. वा. ल्यबन्त धा. सा. अव्यय of आ+ कल्- to consider, know, take notice of- (कल्- कलयति- ते १० ग. उ. प. to hold, bear, wield), आश्रयन्ति- वर्त. प्र. पु. ब. व. of आ+ श्रि- to resort to, have recourse to, to seek refuge with, dwell in- (श्रि- श्रयति-ते १ ग. उ. प. to go to, approach), इह- here, in this world, अपि- also, even, and, न- no, not, इत्थम्- thus, in this manner & सदा- always, constantly- all अव्ययs

मृदुं वै मन्यते पापो भाषमाणमशक्तिकम् ।
जितमर्थं विजानीयात्बुधो मार्दवे सति ॥११॥ - courtesy शारदाप्रकाश-संघ

पापः, (बुधस्य) मृदुम् भाषमाणम् अशक्तिकम् वै मन्यते। बुधः मार्दवे सति, (सः पापः) जितम् अर्थम् विजानीयात्॥

A wicked person considers a soft-speaking (wise) person as very weak. If the wise person follows a mild course, he thinks he has won.

पापः- a sinner, wicked, cruel person & बुधः- learned, knowledgeable person- both in पु. लिं. प्र. वि. ए. व., मृदुम् भाषमाणम्, अशक्तिकम्, जितम्, अर्थम्- all in पु. लिं. द्वि. वि. ए. व. of मृदु- adjctv- soft, mild, भाषमाण- speaking, talking- वर्त. का. वा. धा. सा. वि. of & भाष्- भाषते १ ग. आ. प. to speak, say, अशक्तिक- weak, gutless- शक्तिः- स्त्री. लिं.- power, strength, capability- न शक्तिः- अशक्तिः- नञ् तत्पुरुष स., जित- won, conquered- क. भू. धा. वि. of जि- जयति ४ ग. प. प. to win, conquer, अर्थ- meaning, purpose, मन्यते- वर्त. प्र. पु. ए. व. of मन्- ४ ग. आ. प. to consider, think, understand, believe, मार्दवे & सति- पु. लिं. स. वि. ए. व. of मार्दव- mildness, softness & सत्- being- वर्त. का. वा. धा. सा. वि. of अस्- अस्ति २ ग. प. प. to be, to exist, विजानीयात्- विध्यर्थ प्र. पु. ए. व. of वि+ ज्ञा- to be aware of- (ज्ञा- जानाति- जानीते- ९ ग. उ. प. to know, understand), वै- अव्यय- a particle of affirmation (truly, indeed)

नदीनां शस्त्रपाणिनां नखीनां शृङ्गीणां तथा।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥१२॥- चाणक्यनीतिदर्पण अ. १, श्लो.१५

नदीनाम् शस्त्रपाणिनाम् नखीनाम् शृङ्गीणाम् तथा स्त्रीषु राजकुलेषु च विश्वासः न एव कर्तव्यः (अस्ति) ॥

One should not trust (blindly) the (behaviour) of a river, a person armed with a weapon, an (animal) with claws or horns, women and royal family.

नदीनाम्, शस्त्रपाणिनाम्, नखीनाम् & शृङ्गीणाम्- all in ष. वि. ब.व. of नदी- स्त्री. लिं.- river, शस्त्रपाणिन्- पु. लिं.- an armed person, one who has a weapon in hand- शस्त्रम्- न. लिं.- a weapon, पाणिः -स्त्री. लिं.- hand- शस्त्रम् पाणौ (पाण्याम्) यस्य सः- शस्त्रपाणिन्- बहुव्रीही स., नखिन्- न. लि. -one who has nails, claws- नखः, नखम्- a nail of a finger or toe, claw- यत् नखानि युक्तः अस्ति तत् - नखिन्- बहुव्रीही स., शृङ्गिन्- पु. लि. -one who has horns, स्त्रीषु & राजकुलेषु- with in स. वि. ब. व. of स्त्री- स्त्री. लिं.- a woman, female & राजकुलम्- न. लिं.- royal household, members of royal family- राजन्- पु. लिं.- king & कुलम्- न. लिं. race, family, house- राज्ञः कुलम्- राजकुलम्- ष. तत्पुरुष स., विश्वासः- trust, faith confidence & कर्तव्यः -to be done- कर्तव्य (also करणीय कार्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make- both पु. लिं. प्र. वि. ए. व., तथा- like wise, also, and, न- no, not, एव- just, mere, only नैव- never, not at all- all अव्ययs

नष्टं द्रव्यं लभ्यते कष्टसाध्यं, नष्टा विद्या लभ्यतेऽभ्यासयुक्ता
नष्टारोग्यं सूपचारैः सुसाध्यं, नष्टा वेला या गता सा गतैव ॥१३॥

(मनुष्येण) नष्टम् द्रव्यम् कष्टसाध्यम् लभ्यते, नष्टा विद्या अभ्यासयुक्ता लभ्यते, (मनुष्यस्य) नष्टारोग्यम् सूपचारैः सुसाध्यम् (भवति, परन्तु) या वेला नष्टा (तथा) गता, सा गता एव (भवति)।

Lost wealth can be regained back by hard work. Lost education can be relearnt with regular study. Lost health may be easily recovered with good treatment. (However), (present) time, once lost, is lost forever.

नष्टम्-lost, destroyed- नष्ट- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to be lost, perish, destroyed, द्रव्यम्- wealth, treasure, कष्टसाध्यम्- possible to get after efforts, struggle- कष्ट- adjctv- difficulty, hard to get, साध्यम्- adjctv- achievable, feasible, to be accomplished- साध्य- (साधनीय, साधितव्य)- क. वि. धा. सा. वि. of साध्- साध्नोति५ ग. प. प. & साध्यति ४ ग. प. प. to accomplish, to bring about- कष्टेण साध्यम्- कष्टसाध्यम्- तृ. तत्पुरुष स., नष्टारोग्यम्- lost health, नष्टम्- see above, आरोग्यम्- good health- नष्टम् आरोग्यम्- नष्टारोग्यम्- विशेषणपूर्वपदकर्मधारय स. & सुसाध्यम् -possible easily- सु-अव्यय- prefix implies easy, good, well- सुखेन साध्यम् -तृ. तत्पुरुष स- all in न. लिं. प्र. वि. ए. व., नष्टा- see above, विद्या- knowledge, skill, learning, अभ्यासयुक्ता- accompanied by constant practice, अभ्यास- constant practice, study, exercise- युक्त- accompanied by, endowed with- क. भू. धा. वि. of युज्- युनक्ति युंक्ते ७ ग. उ. प. to harness, prepare, arrange- अभ्यासेण युक्तः- तृ. तत्पुरुष स., या (यद्)- who, वेला- time, opportunity, occasion, सा (तद्)- she, गता- passed, gone- गत- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go- all in स्त्री. लिं. प्र. वि. ए. व., लभ्यते- कर्मणि प्रयोग तृ. पु. ए. व. of लभ्- लभते १ ग. आ. प. to get, सूपचारैः- पु/न. लिं. तृ. वि. ए. व. of सूपचार- सु-see above, उपचार- treatment, service- शोभनः उपचारः- सूपचार- अव्यय पूर्वपद (प्रादि) कर्मधारय., एव- mere, only, just- अव्यय

श्रियो बलममात्यांश्च बलवानिह विन्दति।
यो ह्यनाढ्यः स पतितस्तदुच्छिष्टं यदल्पकम् ॥१४॥ - महाभा. शान्तिपर्व

इह बलवान् श्रियः, बलम्, आमात्यान् च विन्दति। यः हि अनाढ्यः, सः पतितः(अस्ति)। यद् अल्पकम्, तद् उच्छिष्टम् (अस्ति) ॥

In this world, one who is strong and powerful tends to get all prosperity, power and good councillors. A poor person is indeed degraded. Anything small is rejected.

बलवान् (बलवत्)- one who is strong, mighty- (बल- strength, might, वत्- prefix implies possession, quality), यः (यद्)- who, अनाढ्यः- poor, one without any means- आढ्य- adjctv- rich, wealthy- अन् आढ्य- अनाढ्यः- नञ् तत्पुरुष स., सः (तद्)- he, पतितः- fallen, outcast, degraded- क. भू. धा. वि. of पत्- पतति १ ग. प. प. to fall, cast down- all in- पु. लिं. प्र. वि. ए. व., श्रियः- स्त्री. लिं. द्वि. वि. ब. व. of श्री- wealth, prosperity, dignity, बलम्- न. लिं. द्वि. वि. ए. व. of बल- strength, आमात्यान्- पु. लिं. द्वि. वि. ब. व. of आमात्य- councillor, minister, advisor, विन्दति- वर्त. प्र. पु. ए. व. of विद्- विन्दति- ते ६ ग. उ. प. to get obtain, acquire, यद्- which, अल्पकम्- small, contemptible, little, तद्- that it & उच्छिष्टम्- leftover, rejected, stale- उच्छिष्ट- क. भू. धा. वि. of उद्+ शिष्- to leave as remainder, leftover- (शिष्- शेषति १ ग. प. प., ७ ग. प. प. शिनष्टि & १० ग. उ. प. शेषयति- ते- to leave as

remainder)- all in न. लिं. प्र. वि. ए. व., इह- here, in this world, च- and, हि- indeed, surely- all अव्ययs

सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ।
न पावनतमं किञ्चित्सत्यादभ्यधिकं क्वचित् ॥१५॥ - courtesy शारदाप्रकाश-संघ

पारावारस्य नौः इव, स्वर्गस्य सत्यम् सोपानम् (अस्ति)। (सत्यम्) पावनतमम् (अस्ति) । सत्यात् अभ्यधिकम् न किञ्चित् क्वचित् (अस्ति) ॥

Just as a boat is a vehicle to cross a river, the truth is the staircase to heaven. It is most purifying. There is nothing greater than the truth anywhere.

पारावारस्य & स्वर्गस्य- पु/न. लिं. ष. वि. ए. व. of पारावार- an ocean or river- पारः/रं- opposite/other bank (of a ocean or river), अवारः/रं- this side (of an ocean or river)- यस्मै पारं च अवारं च अस्ति तद्- पारावारम्- बहुव्रीही स. & स्वर्ग- heaven, paradise नौः- स्त्री. लिं. प्र. वि. ए. व. of नौ- boat, ship, सत्यम्- truth, honesty, virtue, सोपानम्- ladder, staircase, अभ्यधिकम्- more than, exceeding- अभि- अव्यय- prefix implies more, over, excessively, अधिकम्- more, greater, पावनतमम्- holiest, पावन- adjctv- purifying, sanctifying, तम- suffix indicates superlative degree & किञ्चित्- किम्+ चित्- something, little, न किञ्चित्- nothing- all in न. लिं. प्र. वि. ए. व., सत्यात्- in न. लिं. पं. वि. ए. व. of सत्यम्, क्व- अव्यय- where, क्व+ चित्- क्वचित्- in some place, in some case, rarely, इव- like, similar to, न- no, not -all अव्ययs

नष्टं नष्टमुपेक्षेत प्राप्तं प्राप्तमुपाहरेत्।
निर्विकारतयैतद्धि परमार्चनमात्मनः ॥१६॥ -योगवासिष्ठः ६.३९.४४

(मनुष्यः) नष्टम् नष्टम् उपेक्षेत। (सः) प्राप्तम् प्राप्तम् निर्विकारतया उपाहरेत्।एतत् हि आत्मनः परम् अर्चनम् (भवति) ॥

One should ignore what he has lost or missed out (in life). He should enjoy the things that are available or achievable, with detachment. This alone is the greatest worship of the Self.

नष्टम् & प्राप्तम्- both प्र. वि. & द्वि. वि.- ए. व. of नष्ट- lost, destroyed- क. भू. धा. वि. of नश्- नश्यति ४ ग. प. प. to get destroyed, to be lost & प्राप्त- received, obtained- क. भू. धा. वि. of प्र+ आप्- to get, receive- (आप्- आप्नोति ५ ग. प. प. to get, obtain), उपेक्षेत- विध्यर्थ प्र. पु. ए. व. of उप+ ईक्ष्- to neglect, ignore (ईक्ष्- ईक्षते १ ग. आ. प. to see, observe), उपाहरेत्- विध्यर्थ प्र. पु. ए. व. of उप+आ+हृ- to fetch about, bring about- (हृ- हरति १ ग. प. प. to take, carry, lead); निर्विकारतया- स्त्री. लिं. तृ. वि. ए. व. of निर्विकारता- detachment- विकार- change of form, effect, निर् (निस्)- अव्यय- prefix implies

absence, void- विकारम् निराकृत्य- निर्विकारम्- without effect, detachment- अव्ययीभाव स.- ता- suffix implies quality, possession, अर्चनम्- worship, reverence- (अर्च्- अर्चति- ते १ ग. उ. प. to worship, adore)- in न. लिं. प्र. वि. ए. व., आत्मनः- पु. लिं. ष. वि. ए. व. of आत्मन्- Self, soul, oneself, परम्- the supreme, highest, ultimate & हि- indeed, surely- both अव्ययs

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम्।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ॥१७॥-- courtesy शारदाप्रकाश-संघ

पठतः मूर्खत्वम् न अस्ति । जपतः पातकम् न अस्ति । मौनिनः कलहः न अस्ति । (तथा) जाग्रतः भयम् च न अस्ति॥

A well-read person is not stupid. A praying person does not incur sin. A silent person does not create any quarrel. An attentive person does not face any danger.

पठतः, जपतः, जाग्रतः & मौनिनः- all in ष. वि. ए. व. of पठत्- reading, studying, जपत्- chanting, praying, जाग्रत्- attentive, awake- all three वर्त. का. वा. धा. सा. वि. of पठ्- पठति १ ग. प. प. to read, study, learn from, जप्- जपति १ ग. प. प. to chant, pray & जागृ- जागर्ति २. ग. प. प. to be awake, be watchful, attentive & मौनिन्- a person observing a vow silence- मौनम्- silence- मौनम् आचरति इति -मौनिन्- तत्पुरुष स., मूर्खत्वम्- a stupidity- मूर्खः- a stupid, ignorant- त्व- suffix implies: quality, possession, पातकम्- a sin, crime & भयम्- fear, danger, threat- all in न. लिं. प्र. वि. ए. व., कलहः- a fight, quarrel- in पु. लिं. प्र. वि. ए. व., अस्ति-वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist,च-and, न- no, not

परिश्रमो मिताहारो भूगतावश्विनीसुतौ ।
तावनादृत्य नैवाहं वैद्यमन्यं समाश्रये ॥१८॥-- courtesy शारदाप्रकाश-संघ

परिश्रमः (तथा) मिताहारः (च) भूगतौ अश्विनीसुतौ (स्तः) । अहम्, तौ अनादृत्य, अन्यम् वैद्यम् न एव समाश्रये॥

The Ashwini-twins (two Celestial Physicians), regular vigorous exercise and controlled, measured diet, went to Earth (to make people healthy). I will just not see any other doctor by avoiding these two.

परिश्रमः- continuous efforts, exercise- परि- अव्यय- prefix implies: excessively, successively, about- श्रमः- toil, labour, exertion- श्रमम् परिकृत्य- परिश्रमम्-अव्ययीभाव स., मिताहारः- controlled diet, food- मित- measured, controlled- क. भू. धा. वि. of मा- माति २ ग. प. प. to measure, limit & आहारः- food, diet- मितः आहारः- मिताहारः- विशेषणपूर्वपदकर्मधारय स., भूगतौ, अश्विनीसुतौ & तौ- पु. लिं. प्र. वि. द्वि. व. of भूगत- भूः- स्त्री. लिं.- Earth, land, गत-gone, situated, located, - क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, to set forth- भुवम् गतः - भूगतः- द्वि. तत्पुरुष स., अश्विनीसुतः- अश्विनी- a nymph

considered as wife of the Sun and mother of twins- Aswins, सुत- son- अश्विन्याः सुतः- अश्विनीसुतः- ष. तत्पुरुष स. & तद्- he, that, अनादृत्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of अन्+ आ+ दृ- to disrespect, disregard- (दृ- द्रियते ६ ग. आ. प. to respect, honour), अहम्- पु. लिं. प्र. वि. ए. व. of अस्मद्- I, we, अन्यम् & वैद्यम्- पु. लिं. द्वि. वि. ए. व. of अन्यः- other, another & वैद्यः- physician, doctor, समाश्रये- वर्त. उ. पु. ए. व. of सम+आ+श्रि- to seek refuge with, to have recourse to- (श्रि- श्रयति-ते १ ग. उ. प. to go to, approach), न- no, not, एव- just, mere, alone- न + एव= नैव- just not- अव्ययs

शब्दशास्त्रमनधीत्य यः पुमान् वक्तुमिच्छति वचः सभान्तरे
बन्द्धुमिच्छति वने मदोत्कटं हस्तिनं कमलनालतन्तुना ॥१९॥

यः पुमान् शब्दशास्त्रम् अनधीत्य सभान्तरे वचः वक्तुम् इच्छति, (सः) वने मदोत्कटम् हस्तिनम् कमल-नाल- तन्तुना बन्द्धुम् इच्छति (इव स्यात्) ॥

One who, without studying intricacies of language, desires to give a speech in an assembly (of learned), is like the one who wants to tie down an elephant, fully in rut, by a rope made out of (delicate) lotus stems.

यः (यद्)- who & पुमान् (पुंस्)- man, human, person-both in पु. लिं. प्र. वि. ए. व., शब्दशास्त्रम्- intricacies language, systematic study of speech) शब्दः- पु. लिं.- word, sound, शास्त्रम्- न. लिं.- any department of knowledge, science, systematic study- शब्दाणाम् शास्त्रम्- शब्दशास्त्रम्- ष. तत्पुरुष स.- न. लिं. द्वि. वि. ए. व., वक्तुम् & बन्द्धुम्- पू. का. वा. तुमन्त हेत्वार्थक धा. सा. अव्यय of वच्- वक्ति २ ग. प. प. to say, speak & बन्ध्- बध्नाति ९ ग. प. प. to fasten, tie, bind, अनधीत्य- without studying, अधीत्य- after studying- अन् अधीत्य- अनधीत्य- नञ् तत्पुरुष स.-अधीत्य- पू. का. वा. ल्यबन्त धा. सा. अव्यय of अधि+ इ- to study, learn- (इ-एति २ ग. प. प. to go), सभान्तरे & वने- न. लिं. स. वि. ए. व. of सभान्तरम्- amidst an assembly, meeting- सभा- स्त्री. लिं. - an assembly, council, अन्तर- adjctv- in the middle, inside- सभायाः अन्तरम्- सभान्तरम्- ष. तत्पुरुष स. & वनम्- forest, वचः (वचस्)- speech, command- न. लिं. प्र. वि. ए. व., इच्छति- वर्त. प्र. पु. ए. व. of इष्- ६ ग. प. प. to desire, wish, want, मदोत्कटम् & हस्तिनम्- -both in पु. लिं. द्वि. वि. ए. व. of मदोत्कट- full with rut- मद- rut, ichor or juice that exudes from the temples of an elephant, उत्कट- adjctv- excessive, overflowing -मदेन उत्कटः- मदोत्कटः- तृ. तत्पुरुष स & हस्तिन्- an elephant, कमलनालतन्तुना- पु. लिं. तृ. वि. ए. व. of कमलनालतन्तु- कमल- न. लिं.- lotus, water lily, नाल- न..लिं.- a hollow stalk, tubular stem, तन्तु- पु. लिं.- cord, thread- कमलस्य नालम्- कमलनालम् & कमलनालानाम् तन्तुः- कमलनालतन्तुः - both ष. तत्पुरुष स.

आत्मैवादौ नियन्तव्यो दुष्कृतं संनियच्छता।
दण्डयेच्च महादण्डैरपि बन्धूननन्तरान् ॥२०॥ -महाभा शान्तिपर्व १२.२७३.२९

(राज्ञा/प्रशासकेण) दुष्कृतम् संनियच्छता, आत्मा एव आदौ नियन्तव्यः (भवति)। (सःदुष्कृतात्मनः) बन्धून् अनन्तरान् च अपि महादण्डैः दण्डयेत् ॥

Anyone who wants to curb wrong actions (of others) should first just control his own wrong actions. He should also impose stiff punishments even (to guilty) close relatives.

दुष्कृतम्- wrong doing, bad thing, wicked thing- दुरितम् कृतम्- दुष्कृतम्- समा. प्रादितत्पुरुष स. in न. लिं. द्वि. वि. ए. व. (दुर् /दुस्-अव्यय- implies bad, evil & कृत- doing, done, committed- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make), संनियच्छता- पु. लि. तृ. वि. ए. व. of संनियच्छत्- वर्त. का. वा. धा. सा. वि. of संनि+ यम्- to curb, restrain, control- (यम्- यच्छति १ ग. प. प. to curb, control), आत्मा & नियन्तव्यः- पु. लि. प्र. वि. ए. व. of आत्मन्- oneself, one's own & नियन्तव्य- (also नियम्य & नियमनीय) - to be controlled, restrained- क. वि. धा. वि. of नि+ यम्- to control, curb - see above), बन्धून् & अनन्तरान्- both in- पु. लि. द्वि. वि. ब. व. of बन्धु- brother, relative & अनन्तर- immediate, close, neighbouring- (अन्तर-adjctv- situated outside, other- अन् अन्तर- अनन्तर- close, one's own- नञ् तत्पुरुष स.), महादण्डैः- पु/न. लिं. तृ. वि. ब. व. of महादण्ड- heavy fine, stiff punishment- महत्- big, great, दण्ड- punishment- महत् दण्डम्- महादण्डम्- समा. प्रादितत्पुरुष स., दण्डयेत्- विध्यर्थ प्र. पु. ए. व. of दण्ड्- दण्डयति- ते १० ग. उ. प. to punish, fine, एव- just, mere, alone, आदौ- (आदितः) -अव्यय- at first, from the first or beginning च- and, अपि- also, even-all अव्ययs

सुशीलो मातृपुण्येन पितृपुण्येन पण्डितः।
दातृत्वं वंशपुण्येन आत्मपुण्येन सभाग्यतः ॥२१॥ -- courtesy शारदाप्रकाश-संघ

(मनुष्यः) मातृपुण्येन सुशीलः (भवति), पितृपुण्येन पण्डितः (भवति), दातृत्वम् वंशपुण्येन (प्राप्नोति तथा) आत्मपुण्येन सभाग्यतः (भवति)॥

One's develops a good character due to his/her mother's meritorious deeds. He/she becomes a scholar due to the good teachings of his/her father. Philanthropic nature comes with the family's good deeds but prosperity comes only due to his/her good work.

मातृपुण्येन, पितृपुण्येन, वंशपुण्येन & आत्मपुण्येन- al in न. लिं. तृ. वि. ए. व. of मातृपुण्यम्- mother's meritorious deeds- मातृ- mother, पुण्यम्- meritorious deed- मातुः पुण्यम्- मातृपुण्यम्, पितृपुण्यम्- father's meritorious deeds, पितृ- father- पितुः पुण्यम्- पितृपुण्यम्, वंशपुण्यम्- meritorious deeds of the family- वंशम्- family, forefathers- वंशस्य पुण्यम्- वंशपुण्यम् & आत्मपुण्यम्- meritorious deeds of himself- आत्मन्- oneself, one's own- आत्मनः पुण्यम्- आत्मपुण्यम्- all ष. तत्पुरुष स., सुशीलः- well mannered, one having good character- शीलम्- character, nature- सु- अव्यय- a particle prefixed implies: good, noble- सुभगम् शीलम् यस्य सः- सुशीलः- बहुव्रीही स., पण्डितः- knowledgeable, expert, intelligent & सभाग्यतः- one with fortune, prosperity- भाग्यम्- good fortune, prosperity- भाग्येन सह- सभाग्यम्- सहबहुव्रीही स.- तः(तस्)- suffix implies possession, having- all in पु. लिं. प्र. वि. ए. व., दातृत्वम्- generosity, philanthropic nature- दातृ- giver, donor, त्व- suffix implies quality, possession- पु/न. लिं. द्वि. वि. ए. व.

क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम्।
क्षेत्रबीजसमायोगात्ततः सस्यं समृद्ध्यते ॥२२॥ -महाभा-अनुशासन पर्व १३.९.१०

पुरुषकारः क्षेत्रम्, दैवम् तु बीजम् (इति) उदाहृतम् । ततः क्षेत्रबीजसमायोगात् सस्यम् समृद्ध्यते॥

It is said that (great) efforts by a man creates fertile soil. However, the seed depends upon destiny. A plant flourishes by proper union of the soil and the seed.

पुरुषकारः- efforts of a man, पुरुषः- man, person, कार- adjctv- effort, exertion- पुरुषस्य कारः- पुरुषकारः- ष. तत्पुरुष स.- पु. लिं. प्र. वि. ए. व., क्षेत्रम्- field, area, soil, ground, उदाहृतम्- said, illustrated, narrated- उदाहृत- क. भू. धा. वि. of उद्+ आ + हृ- to declare, say- (हृ- हरति-ते १ ग. उ. प. to take, carry, convey), बीजम्- seed, सस्यम्- produce of any plant, corn, plant & दैवम्- fate, destiny, fortune- all in न. लिं. प्र. वि. ए. व., क्षेत्रबीजसमायोगात्- पं. वि. ए. व. of क्षेत्रबीजसमायोग- union of field and seed- क्षेत्रम्- field, बीजम्-seed, समायोग- union, combination, meeting- क्षेत्रम् च बीजम् च- क्षेत्रबीजम्- द्वंद्व स., क्षेत्रबीजयोः समायोगः- क्षेत्रबीजसमायोगः- ष. तत्पुरुष स., समृद्ध्यते- कर्मणि प्रयोग- सं+ ऋध् to thrive, prosper- (ऋध्- ऋध्यति, ऋध्नोति- ४ & ५ ग. प. प. to flourish, prosper), तु- but, on the other hand, ततः (ततस्)- then, from that, thereupon- both अव्यय

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठके गुणाः ॥२३॥- courtesy शारदाप्रकाश-संघ

पाठके तु, माधुर्यम्, अक्षरव्यक्तिः, पदच्छेदः, सुस्वरः, धैर्यम् (तथा) लयसमर्थम् च एते षड् गुणाः (सन्ति) ॥

Pleasing nature, distinct pronunciation, clear separation of words, good voice, composure and ability for melodious delivery, these six are indeed the qualities of a good teacher.

पाठके- पु. लिं. स. वि. ए. व. of पाठक- teacher, public reader, scholar, माधुर्यम्- exquisite beauty, pleasantness, धैर्यम्- boldness, composure, steadiness & लयसमर्थम्- ability to have deep concentration- लय-delight, devotion, musical merriness, समर्थम्- strength, power, force- लये समर्थम्- लयसमर्थम्- स. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., अक्षरव्यक्तिः- clear pronunciation- अक्षर- alphabet, word, syllable, व्यक्तिः- clarity, perception, distinctness- अक्षराणाम् व्यक्तिः- अक्षरव्यक्तिः- ष. तत्पुरुष स.- स्त्री. लिं. प्र. वि. ए. व., पदच्छेदः- separation of words- पदः- step, position, tread, छेदः- dividing, cutting, separation- पदानाम् छेदः- पदच्छेदः-ष. तत्पुरुष स. & सुस्वरः - melodious voice- स्वरः - voice, tone, सु- अव्यय- prefix implies good, beautiful- सुभगः स्वरः - सुस्वरः -समा. प्रादितत्पुरुष स.- both in -पु. लिं. प्र. वि. ए. व., एते, षड् & गुणाः- all in पु. लिं. प्र. वि. ब. व. of एतद्- this, it, षड् (षट्)- six & गुण- quality, virtue, तु- but, on the other hand, च-and- both अव्यय

यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनो श्वजनो माऽभूत्सकलं शकलं सकृत्शकृत् ॥२४॥

पुत्र, यदि अपि बहु न अधीषे, तथा अपि व्याकरणम् पठ, (यथा) स्वजनः श्वजनः मा अभूत्, सकलम् शकलम् (मा अभूत्,) सकृत् शकृत् (मा अभूत्) ॥

My son, even if you do not study much, then at least study grammar lest you call 'dogs' to your 'own people' ,'fragment' instead of 'entire' or 'excrement' instead of 'once' .

पुत्र- son, child- पु. लिं. सं. वि. ए. व., अधीषे- आ. प. सामान्य भविष्य. द्वि. पु. ए. व. of अधि+ इ- (अधीते) to study, learn- (इ-एति २ ग. प. प. to go), व्याकरणम्- grammar, decomposition, analysis- in न. लिं. द्वि. वि. ए. व., पठ- आज्ञार्थ मध्यम. पु. ए. व. of पठ्- पठति- १ ग. प. प. to read, study, स्वजनः- relation, own people- स्व- pronominal adjctv- one's own, belonging to oneself, जन- a creature, people, man- स्वस्य जनः- स्वजनः-ष. तत्पुरुष स., श्वजनः- group of dogs- श्वन्- पु. लिं.-a dog- श्वा जनः- श्वजनः- समा. प्रादितत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., सकलम्-adjctv- entire, all, whole, शकलम्- fragment, bit, piece, शकृत्- excrement, ordure- all in न. लिं. प्र. वि. ए. व., अभूत्- सामान्य भूत. प्र. पु. ए. व. of भू-भवति १ ग. प. प., सकृत्- once, at one time, formerly, यदि- in case, if, तथा- that way, like that, thus, अपि- even, also, बहु- much, large, huge, न- no, not, मा- a particle of prohibition- that not, lest- all अव्ययs

प्रवारणं तु बालानां पूर्वं कार्यमिति श्रुतिः।
तस्मात् प्रवारणं पूर्वमर्हः पार्थो धनंजयः ॥२५॥ -महाभा. उद्योगपर्व अ.७ श्लो. १७

प्रवारणम् तु बालानाम् पूर्वम् कार्यम् इति श्रुतिः (अस्ति)। तस्मात् पार्थः, धनंजयः प्रवारणम् पूर्वम् अर्हः (भवति) ॥

(Said by Shrikrishna to Duryodhana when he and Arjuna had gone to him to seek his help during forthcoming Mahabharat War)

A time-honoured saying is that desire of a younger person is to be attended first. Therefore, Dhananjay (Arjuna) deserves to be satisfied beforehand (first).

प्रवारणम्- न. लिं. प्र. & द्वि. वि. ए. व. of प्रवारण- satisfying, priority of choice, prohibition, बालानाम्- पु. लिं. ष. वि. ब. व. of बल- young person, child, कार्यम्- न. लिं. प्र. वि. ए. व. of कार्य- (also करणीय, कर्तव्य, कृत्य)- क. वि. धा. सा. वि. of कृ-करोति- कुरुते ८ ग. उ. प. to do, make), श्रुतिः- a Vedic or sacred text, dictate, practice- स्त्री. लिं. प्र. वि. ए. व., तस्मात्- therefore, hence- पु/न. पं वि. ए. व. of तद्-that, it, पार्थः- a metronymic of Arjuna, धनंजयः- Arjuna -(सर्वाञ्जनपदाञ्जित्वा वित्तमादाय केवलम् ।

मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनंजयं), अर्हः- adjctv- worthy, deserving, having a claim to- all in - पु. लिं. प्र. वि. ए. व., पूर्वम्- before, first, beforehand, तु- but, on the other hand, इति- this, in this manner-all अव्ययs,

प्रियं वा यदि वा द्वेष्यं शुभं वा यदि वाशुभम् ।
अपृष्टोऽपि हितं ब्रूयाद् यस्य नेच्छेत् पराभवम् ॥२६॥

(मनुष्यः) यस्य पराभवम् न इच्छेत्, अपृष्टः अपि, (तस्य) हितम् ब्रूयात्, यदि वा प्रियम् वा द्वेष्यम्, यदि वा शुभम् वा अशुभम् ॥

One should give beneficial advice to a person, whose failure he does not want to see, even if it is not asked, is liked or hated, pleasant or unpleasant.

यस्य- whose- पु. लिं. ष. वि. ए. व. of यद्, इच्छेत् & ब्रूयात्- विध्यर्थ प्र. पु. ए. व. of इष्- इच्छति ६. ग. प. प. to desire, want & ब्रू- ब्रवीति- ब्रूते २ ग. उ. प. to speak, talk, पराभवम् & हितम्- न. लिं. द्वि. वि. ए. व. of पराभव- defeat, failure & हित- proper, beneficial, sound, advantageous- क. भू. धा. वि. of हि- हिनोति- ५ ग. प. प. to promote, gratify, incite, please, प्रियम्- pleasing, desirable, liked- (प्री- प्रीणाति -प्रीणीते ९ ग. उ. प. to please, delight), द्वेष्यम्- hated, disliked- द्वेष्य- (द्विषितव्य & द्विषनीय)- to be hated, disagreeable- क. वि. धा. सा. वि. of द्विष्- द्वेष्टि- द्विष्टे २ ग. उ. प. to hate, dislike, शुभम्- auspicious, lucky, bright- न शुभम्- अशुभम्- नञ् तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., अपृष्टः- without being asked- न पृष्टः- अपृष्टः- नञ् तत्पुरुष स.- पृष्ट- क. भू. धा. वि. of प्रच्छ्- पृच्छति- ६ ग. प. प. to ask, , question- in पु. लिं. प्र. वि. ए. व., न -no, not, यदि- in case, if, वा- or, if, अपि- even, also, and- all अव्ययs

यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः ।
तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ॥२७॥ -मनुस्मृतिः ४/१६१

यद् कर्म अस्य कुर्वतः अन्तरात्मनः परितोषः स्यात्, (सः) तद् (कर्म) प्रयत्नेन कुर्वीत। (सः) विपरीतम् (कर्म) तु वर्जयेत्॥

One should try hard to do that work, which satisfies immensely his innermost Self. On the other hand, he should give up any contrary undertaking.

यद्- which, कर्म (कर्मन्)- work, project, doing, तद्- that, it & विपरीतम्- adjctv- contrary, opposite, reverse, inverse -(वि- अव्यय- prefix to noun implies- reverse, opposite- परीत- surrounded, seized- क. भू. धा. वि. of परि+ इ- to surround, encompass- इ- एति २ ग. प. प. to go)- all in न. लिं. द्वि. वि. ए..व.; कुर्वतः, अस्य & अन्तरात्मनः- all in पु. लिं. ष. वि. ए..व. of- कुर्वत्- doing, engaged in- वर्त.

का. वा. धा. सा. वि. of कृ- करोति-कुरुते ८ ग. उ. प. to do, make, इदम्- he & अन्तरात्मन्- the inmost spirit or soul, mind, heart- अन्तर्- अव्यय- prefix to noun implies: inside, within, interior & आत्मन्- पु. लिं.- Soul, Self, one's own, परितोषः- supreme satisfaction- परि- अव्यय- prefix to noun implies: very much, excessively, complete, तोषः- satisfaction, pleasure, joy- (तुष्- तुष्यति ४ ग. प. प. to be pleased), स्यात्, कुर्वीत & वर्जयेत्- विध्यर्थ प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, कृ- आ. प.- to do- (see above) & वृज्- वर्जति-१ ग. प. प. & वर्जयति- ते १० ग. उ. प. to avoid, shun, प्रयत्नेन- तृ. वि. ए. व. of प्रयत्न- effort, exertion, endeavour, तु- but, on the other hand- अव्यय

द्वेष्यो न साधुर्भवति मेधावी न पंडितः।
प्रिये शुभानि कार्याणि द्वेष्ये पापानि चैव हि ॥२८॥-महाभा- विदुरनीति अ. ३९ श्लो.

द्वेष्यः साधुः न भवति, मेधावी न (भवति), पंडितः (न भवति) । प्रिये कार्याणि शुभानि (भवन्ति), द्वेष्ये (कार्याणि) पापानि च एव हि (भवन्ति) ॥

A hated person is cannot become a noble person, not an intelligent person, not a scholar. Acts of a likeable person are judged virtuous while those of a disliked person are indeed sinful.

द्वेष्यः- hateful, disagreeable, to be disliked- द्वेष्य- (द्विषनीय & द्विषितव्य)- क. वि. धा. सा. वि. of द्विष्- द्विष्टि/ द्विष्टे- २ ग. उ. प. to hate, dislike, साधुः- a noble, saintly person, मेधावी (मेधावीन्)- learned or intelligent person, scholar & पंडितः- an expert, a knowledgeable person, wise man- all in पु. लिं. प्र. वि. ए. व., भवति- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, to happen, प्रिये & द्वेष्ये- both in पु/न. लिं. स. वि. ए. व. ; प्रिय- adjctv- pleasing, likeable, कार्याणि, शुभानि & पापानि- न. लिं. प्र. वि. ब. व. of कार्यम्- work, doing, act- कार्य- (also कर्तव्य, करणीय & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति-कुरुते ८ ग. उ. प. to do, make, शुभम्- auspicious, lucky, good & पापम्- sinful, evil, wicked, न- no, not, च- and, एव- just, mere, only, हि- surely, indeed- all अव्ययs

यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः।
न च विद्यागमोऽप्यस्ति वासस्तत्र न कारयेत् ॥२९॥--चाणक्य नीतिदर्पण अ. १, श्लो ८

यस्मिन् देशे न सम्मानः (अस्ति), न वृत्तिः (अस्ति), न च बान्धवाः (सन्ति), न च विद्यागमः अपि अस्ति, तत्र (कोऽपि) वासः न कारयेत्।

One should not stay in a country where there is no respect for an individual, no means of living, available, no relatives and not even an institution to acquire knowledge.

यस्मिन्- in which & देशे- पु. लिं. स. वि. ए. व. of यद्- which & देशः- country, region place, वृत्तिः- occupation, business, means of existence- स्त्री. लिं. प्र. वि. ए. व., बान्धवाः- in पु. लिं. प्र. वि. ब. व. of बान्धव- relative, kinsman, अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be,to exist, कारयेत्- प्रयोजक विध्यर्थ प्र. पु. ए. व. of कृ- करोति कुरुते ८ ग. उ. प. to do, make, सम्मानः- dignity, honour, कश्चित्- some, little bit, विद्यागमः- facility of learning, possibility of gaining knowledge- विद्या- स्त्री. लिं.- Knowledge, education, learning- आगमः- acquisition, course, arrival, coming- विद्यायाः आगमः- विद्यागमः- ष. तत्पुरुष स.-all in पु. लिं. प्र. वि. ए. व., वासः- न. लिं. द्वि. वि. ए. व. of वासस्- lodging for the night stay, दिवसम्- पु/न. लिं. द्वि. वि. ए. व. of दिवस-day, वसेत्- विध्यर्थ प्र. पु. ए. व. of वस्- वसति १ ग. प. प. to live, stay, dwell, अपि-even, also, तत्र- there, in that place, न- no, not, च- and- all अव्ययs

यावदस्खलितं तावत् सुखं याति सभे पथि।
सकृच्च स्खलितं किञ्चिद् विषमं च पदे पदे ॥३०॥

यावत् सभे पथि अस्खलितम् (याति), तावत् सुखम् याति। सकृत् च किञ्चिद् स्खलितम् (याति), विषमम् च पदे पदे (याति)।

As long as one travels steadily on a smooth road, he achieves happiness. However, if he stumbles even once, he faces troubles at every step.

(One should live with proper and right conduct. If he slips, he will suffer the consequences for the rest of his life.)

स्खलितम्- stumbled, fallen, slipped- स्खलित- क. भू. धा. वि. of स्खल्- स्खलति-१. ग. प. प. to stumble, fall, slip, न स्खलितम्- अस्खलितम्- नञ् तत्पुरुष स.- steady, firm, unhurt, सुखम्- happily, joyfully, किञ्चित्- (किम्+ चित्)- little, some, विषमम्- rough, odd, rugged, troublesome- all in न. लिं. प्र. वि. ए. व., याति- वर्त. प्र. पु. ए. व. of या- २ ग. प. प. to go, move, proceed, सभे & पथि- पु. लिं. स. वि. ए. व. of सभ- proper, leveled, refined & पथिन्- road, path, पदे- न. लिं. स. वि. ए. व. of पदम्- step, foot, पदे पदे- at every step, यावत्- till which time, until, as long as, तावत्- till that time, till such time, सकृत्- just once, one occasion- all अव्ययs

वनस्पतेरपक्वानि फलानि प्रचिनोति यः।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति॥३१॥ -महाभा- विदुरनीतिः

यः (मनुष्यः) वनस्पतेः अपक्वानि फलानि प्रचिनोति, सः तेभ्यः (फलेभ्यः) रसम् न आप्नोति (तथा) अस्य बीजम् च विनश्यति॥

One, who plucks unripened fruits from the trees, will not get the juice from them and the seed of that tree is destroyed.

यः & सः पु. लिं. प्र. वि. ए. व. of यद्- who & तद्- he, वनस्पतेः- पु. लिं. पं. वि. ए. व. of वनस्पति- fruit bearing tree, tree in general & तेभ्यः- न. लिं. पं. वि. ब. व. of तद्- it, he, अपक्वानि & फलानि- न. लिं. द्वि. वि. ब. व. of अपक्वम्- unripened, raw- पक्व- adjctv- ripe, cooked, mature- न पक्व- अपक्व- नञ् तत्पुरुष स. & फल- fruit, प्रचिनोति, विनश्यति & आप्नोति- all in वर्त. प्र. पु. ए. व. of प्र+ चि- to gather, collect- (चि- चिनोति- चिनुते ५ ग. उ. प. to pick, collect), वि+ नश्- to get destroyed, perished- (नश्- नश्यति ४ ग. प. प. to be lost, vanish) & आप्- ५ ग. प. प. to get, obtain, रसम्- juice, essence- in न. लिं. द्वि. वि. ए. व., अस्य- पु/न. लिं. ष. वि. ए. व. of इदम्- he, it, बीजम्- seed- in न. लिं. प्र. वि. ए. व., न- no, not & च- and- both अव्ययs

परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः ॥३२॥ -महाभा. विदुरनीतिः

यः स्वयम् वर्तमानः परम् दोषेण क्षिपति, तथा अनीशानः (परम्) च क्रुध्यति, सः नरः मूढतमः (अस्ति) ॥

A person who blames other for his own shortcomings and gets angry with him without authority is indeed very stupid.

यः(यद्)- who, वर्तमानः- being, वर्तमान- वर्त. का. वा. धा. सा. वि. of वृत्- वर्तते १ ग. आ. प. to be, to exist, अनीशानः- not being having any authority or power, powerless -(ईश्- ईष्टे २ ग. प. प. to rule, to be master of- ईश- adjctv- master, powerful)- ईशानः- ruler, master, lord- अन् ईशानः- नञ् तत्पुरुष स., सः (तद्)- he, that, नरः- man, person & मूढतमः- a greatest fool, stupidest- मूढः- stupid, fool, intoxicated- मूढ- क. भू. धा. वि. of मुह्- मुह्यति ४ ग. प. प. to be senseless, stupid & तम- suffix indicates superlative degree- all in पु. लिं. प्र. वि. ए..व., परम्- पु. लिं. द्वि. वि. ए. व. of पर- another person, stranger, दोषेण- तृ. वि. ए. व. of दोष- fault, defect, blame, shortcoming, क्षिपति & क्रुध्यति- वर्त. प्र. पु. ए. व. of क्षिप्- क्षिपति- ते- ६ ग. उ. प. to cast, to fix on, to abuse & क्रुध्- ४ ग. प. प. to be angry, च- and, स्वयम्- oneself, one's own, तथा- like that, in that way-all अव्ययs

लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः।
जिह्वाग्रे बन्धनं प्राप्तं जिह्वाग्रे मरणं ध्रुवम् ॥३३॥ -सुभाषितरत्नभाण्डरगार

जिह्वाग्रे लक्ष्मीः वसति। जिह्वाग्रे मित्रबान्धवाः (सन्ति)। जिह्वाग्रे बन्धनम् प्राप्तम् (भवेत्)।
जिह्वाग्रे मरणम् ध्रुवम् (भवेत्) ॥

Goddess of Wealth (Lakshmi) resides on one's tip of the tongue. Relationships with friends and relatives rest on the (proper use of) tip of the tongue. (On the other hand) one is imprisoned or may even face death by the (improper use of) tip of the tongue.

(One can become very rich and have excellent relationships by speaking properly but can also ruin himself by improper speech.)

जिह्वाग्रे- पु/न. लिं. स. वि. ए. व. of जिह्वाग्र- tip of the tongue- जिह्वा- स्त्री. लिं. -tongue, अग्र- adjctv- tip, foremost point- जिह्वायाः अग्रम्- जिह्वाग्रम्- ष. तत्पुरुष स, लक्ष्मीः- Goddess of wealth, wealth, prosperity- स्त्री. लिं. प्र. वि. ए. व., वसति- वर्त. प्र. पु. ए. व. of वस्- १ ग. प. प. to stay, dwell, live, मित्रबान्धवाः- - पु. लिं. प्र. वि. ब. व. of मित्रबान्धवः- friends and relatives- मित्रम्- न. लिं.- friend, बान्धवः- relative- मित्रम् च बान्धवः च- मित्रबान्धवः- द्वंद्व स., बन्धनम्- bondage, act of binding, a bond, प्राप्तम्- obtained, achieved- प्राप्त- क. भू. धा. वि. of प्र+ आप्- to get, receive- (आप्- आप्नोति- ५ ग. प. प. to get, obtain), मरणम्- death, destruction, ध्रुवम्- adjctv- certain, surly, eternal- all in -न. लिं. प्र. वि. ए. व.

न तद्बलं यन्मृदुना विरुध्यते सूक्ष्मो धर्मस्तरसा सेवितव्यः।
प्रध्वंसिनी क्रूरसमाहिता श्रीः मृदुप्रौढा गच्छति पुत्रपौत्रान्॥३४॥ -महाभा विदुरनीति ३६.७१

बलम् यद् मृदुना विरुध्यते तद् न (बलम् अस्ति) । धर्मः सूक्ष्मः (तथा) तरसा सेवितव्यः (भवति)। क्रूरसमाहिता श्रीः प्रध्वंसिनी (भवति)। मृदुप्रौढा (श्रीः) पुत्रपौत्रान् गच्छति ॥

Power without tenderness is no strength at all. Dharma is precise and need to be followed with vigour. The wealth accumulated by cruel means is very destructive. The wealth acquired by gentle means reaches children and grandchildren.

बलम्- power, strength, might, यद्- which, तद्- that, it- all in न. लिं. प्र. वि. ए. व., मृदुना & तरसा- पु/न. तृ. वि. ए. व. of मृदु- adjctv- soft, tender, mild, gentle & तरस्- न. लिं.- vigour, strength, speed, विरुध्यते- कर्मणि प्रयोग आ. प. तृ. पु. ए. व. of वि+ रुध्- to oppose, obstruct- (रुध्- रुणद्धि रुंद्धे ७ ग. उ. प. to obstruct, hinder), धर्मः- prescribed codes of conduct, religion, सूक्ष्मः- adjctv- subtle, delicate, exquisite, precise & सेवितव्यः- to be attended to, to be followed- सेवितव्य- (also- सेवनीय & सेव्य)- क. वि. धा. सा. वि. of सेव्- सेवते १ ग. आ. प. to attend to, serve- all in पु. लिं. प्र. वि. ए. व., क्रूरसमाहिता- accumulated by cruel means -क्रूर- cruel, wicked, समाहित- collected, accumulated- क. भू. धा. वि. of सम्+ आ+हि- to collect, gather - (हि- हिनोति ५ ग. प. प. to cast, discharge), श्रीः- wealth, prosperity, प्रध्वंसिनी- (प्रध्वंसिन्)- destructive, ruinous- (ध्वंस्- ध्वंसते १ ग..आ. प. to ruin, perish) & मृदुप्रौढा- grown by gentle means- (मृदु- tender soft, प्रौढ- full-grown, matured, grown- मृदुना प्रौढः- मृदुप्रौढः- तृ. तत्पुरुष. स.)- all in स्त्री. लिं. प्र. वि. ए. व., पुत्रपौत्रान्- पु. लिं. द्वि. वि. ब. व. of पुत्रपौत्रः- child & grandchild- पुत्र- child, पौत्रः- grandchild- पुत्रः च. पौत्रः च - पुत्रपौत्रः- द्वंद्व स., गच्छति- वर्त. तृ. पु. ए. व. of गम्- १ ग. प. प. to go, reach, न- no, not

दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते।
भिन्ना श्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्तते ॥३५॥ -महाभा शान्तिपर्व १११.८५

भिन्नम् दुःखेन श्लिष्यते। श्लिष्टम् दुःखेन भिद्यते। या प्रीतिः तु भिन्ना श्लिष्टा, सा स्नेहेन न वर्तते॥

Broken relationship may get repaired in times of sorrow. Close relationship may break during tough times. However, a broken love may not be repaired just by friendliness.

श्लिष्यते & भिद्यते- both in कर्मणि तृ. पु. ए. व. of श्लिष्- श्लिष्यति- ४ ग. प. प. to come together, embrace, stick, join & भिद्- भिनत्ति- भिंत्ते ७ ग. उ. प. to divide, cut into parts break, भिन्नम्- separated, divided, broken- भिन्न- क. भू. धा. वि. of भिद्- see above & श्लिष्टम्- united, joined- श्लिष्ट- क. भू. धा. वि. of -श्लिष्- see above- both in न. लिं. प्र. वि. ए. व., दुःखेन & स्नेहेन- न. लिं. तृ. वि. ए. व. of दुःख- sorrow, difficult time, misery & स्नेह- friendship, intimacy, या- (यद्)- which, प्रीतिः -love, affection, delight, भिन्ना- separated, divided, broken, श्लिष्टा- united, joined & सा- (तद्)- she- all in स्त्री. लिं. प्र. वि. ए. व., वर्तते- वर्त. तृ. पु. ए. व. of वृत्- १ ग. आ. प. to behave, to remain, take place, तु - but, on the other hand, न-no, not- both अव्ययs

प्रेरकः सूचकश्चैव वाचको दर्शकस्तथा।
शिक्षको बोधकश्चैव षडेते गुरवः स्मृताः ॥३६॥ -- courtesy शारदाप्रकाश-संघ

प्रेरकः, सूचकः च एव वाचकः, दर्शकः तथा, शिक्षकः, बोधकः च एव एते षड् गुरवः स्मृताः (भवन्ति) ॥

A leader, an indicator, a reader, a demonstrator, a teacher and a councillor- these six are remembered as preceptors (Gurus).

प्रेरकः-an impeller, sender- (प्र + ईर- to propel, send forth- ईर्- ईर्ते- २ ग. आ. प. to go, shake, rise), सूचकः- an indicator, the reader, informer- (सूच्- सूचयति- ते १० ग. उ. प. to point out, show) वाचकः- speaker, reader, reciter- (वच्- वक्ति २ ग. प. प. to speak, talk- वाचयति-ते- recites, reads), दर्शकः- demonstrator, exhibitor- (दृश्- दर्शयति-ते १० ग. उ. प. to demonstrate, prove, show), शिक्षकः- teacher, instructor- (शिक्ष्- शिक्षते १ ग. आ. प. to learn, study) & बोधकः - councillor, advisor- (बुध्- १ ग. उ. प. बोधति-ते & ४ ग. आ. प. बुध्यते- to understand, comprehend- बोधयति-ते- advices, acquaints)- all in पु. लिं. प्र. वि. ए. व., एते- (these), षड्, गुरवः & स्मृताः - all in पु. लिं. प्र. वि. ब. व. of एतद्- this, षष्- six, गुरु- teacher, preceptor, elder, respectable person & स्मृत- remembered, said to be, borne, - क. भू. धा. वि. of स्मृ- स्मरति १ ग. प. प. to keep in mind, remember, च- and, एव- just, only, mere & तथा- like that, and- all अव्ययs

अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति ।
दुर्लभान्यपि कार्याणि सिध्यन्ति प्रोद्यमेन वै ॥३७॥ -- courtesy शारदाप्रकाश-संघ

(मनुष्यः) तिलेभ्यः तैलानि अनुद्योगेन न आप्तुम् अर्हति। प्रोद्यमेन दुर्लभानि अपि कार्याणि वै सिध्यन्ति॥

One does not deserve to get oil from sesame seeds without any effort. Even the most difficult tasks are accomplished with strenuous effort, indeed.

तिलेभ्यः- न. लि. पं. वि. ब. व. of तिलम्- sesame seed, तैलानि- न. लि. द्वि. वि. ब. व. of तैलम्- oil, अनुद्योगेन & प्रोद्यमेन- both पु. लि. तृ. वि. ए. व. of अनुद्योग- non- activity, without exertion, effort- उद्योग- business, work, diligence- अन् उद्योगः- अनुद्योगः- नञ् तत्पुरुष स. & प्रोद्यम (प्र+ उद्यम) - strenuous or assiduous exertion, effort- उद्यम- effort, industry- प्र- अव्यय- prefix implies intensity, power, force, आप्तुम्- to get, receive- पू. का. वा. हेत्वार्थक तुमन्त धा. सा. अव्यय of आप्- आप्नोति - ५ ग. प. प. to get, receive, अर्हति- वर्त. प्र. पु. ए. व. of अर्ह्- १ ग. प. प. to deserve, to have a right, to be entitled to, दुर्लभानि & कार्याणि- न. लि. प्र. वि. ब. व. of दुर्लभ- difficult to get, rare- दुःखेन लभ्यते इति- दुर्लभः- उपपद तत्पुरुष स. & कार्य- work, project, job कार्य- (also करणीय, कर्तव्य कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, सिध्यन्ति- वर्त. प्र. पु. ब. व. of सिध्- सिध्यति ४ ग. प. प. to materialise, to be accomplished, न- no, not, वै- a particle of affirmation or certainly- surely indeed, अपि- also, even- all अव्ययs

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥३८॥ - महाभा- विदुरनीति

(यः) अमित्रम् मित्रम् कुरुते, मित्रम् द्वेष्टि, हिनस्ति च, (तथा) दुष्टम् कर्म च आरभते, तम् (बुधाः) मूढचेतसम् आहुः॥

Wise men call a person stupid who makes friendship with an enemy, hates and hurts his real friend and starts an evil work (to hurt others).

मित्रम्- friend, न मित्रम्- अमित्रम्- नञ् तत्पुरुष स.- an unfriendly person, enemy, दुष्टम्- wicked, evil, cruel- दुष्ट- क. भू. धा. वि. of दुष्- दुष्यति- ४ ग. प. प. to be bad, to damage & कर्म (कर्मन्)- work, act, doing- all in न. लिं. द्वि. वि. ए. व., तम् & मूढचेतसम्- both in पु. लिं. द्वि. वि. ए. व. of तद्- he & मूढचेतस्- a stupid person- मूढ- stupefied, foolish, confounded- क. भू. धा. वि. of मुह्- मुह्यति ४ ग. प. प. to be stupid, foolish, चेतस्- न. लिं.- mind, sense, consciousness- मूढम् चेतः यस्य सः- मूढचेतसः- बहुव्रीही स., कुरुते, द्वेष्टि, हिनस्ति & आरभते- all-in वर्त. प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make, द्विष्- द्वेष्टि- द्विष्टे-२ ग. उ. प. to hate, dislike, हिंस्- ७ ग. प. प. to strike, harm, trouble & आ+ रभ्- to start, attempt- (रभ्- रभते १ ग. आ. प. to begin), आहुः- in वर्त. प्र. पु. ब. व. of ब्रू- ब्रवीति (आह)- ब्रूते- २ ग. उ. प. to say, speak, च- and- अव्यय

यदि न स्युर्मानुषेषु क्षमिणः पृथिवीसमाः।
न स्यात्सन्धिर्मनुष्याणां क्रोधमूलो हि विग्रहः ॥३९॥ -महाभा आरण्यकपर्व ३.२९.२८

यदि मानुषेषु पृथिवीसमाः क्षमिणः न स्युः, मनुष्याणाम् सन्धिः न स्यात्। क्रोधमूलः हि विग्रहः (अस्ति) ॥

(Said by युधिष्ठिर to द्रौपदी):

Among men, if none were forgiving, like the mother earth, there would be no peace among men. Anger (resulting from intolerence) is indeed the root cause of all quarrels.

मानुषेषु- पु. लिं. स. वि. ब. व. of मानुष- a man, human being, पृथिवीसमाः & क्षमिणः- both in पु. लिं. प्र. वि. ब. व. of पृथिवीसम- पृथिवी- स्त्री. लिं.- earth, सम- adjctv- like, same, equal- पृथिव्याः समः- पृथिवीसमः- ष. तत्पुरुष स. & क्षमिन्- adjctv- patient, forbearing, forgiving- स्युः- विध्यर्थ प्र. पु. ब. व. & स्यात्- विध्यर्थ प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प.- to be, to exist, मनुष्याणाम्- in पु. लिं. ष. वि. ब. व. of मनुष्य- a man, human being, सन्धिः- treaty of peace, agreement, friendship- स्त्री. लिं. प्र. वि. ए. व., विग्रहः- quarrel, strife, fight & क्रोधमूलः- Origin of anger, Root cause in anger- क्रोध- anger, wrath, मूल- root, basis, origin- क्रोध: मूलं यस्य सः- क्रोधमूलः- बहुव्रीही स.- both in- पु. लिं. प्र. वि. ए. व., हि- surely, indeed, यदि- if, in case, in which case, न-no, not -all अव्ययs

आजगाम यदा लक्ष्मीर्नारिकेलफलाम्बुवत्।
निर्जगाम यदा लक्ष्मीर्गजभुक्तकपित्थवत् ॥४०॥ -महासुभषितसंग्रह

यदा लक्ष्मीः आजगाम (सा) नारिकेल- फलाम्बुवत् (आजगाम)। यदा लक्ष्मीः निर्जगाम (सा) गजभुक्त- कपित्थवत् (निर्जगाम) ॥

When prosperity comes, (it arrives slowly) like the (sweet) water inside a coconut. However, when it departs, it leaves like wood-apple tree, trampled by an elephant while feeding on it (suddenly).

लक्ष्मीः- wealth, prosperity, goddess of wealth, नारिकेलफलाम्बुवत्- like water getting collected inside the tender coconut- नारिकेलः (रः)- पु. लिं- coconut, फलम्- न. लिं- fruit, अम्बु- न. लिं- water, वत्- अव्यय- an affix to noun or adjctv implies likeness, similarity- नारिकेलस्य फलम्- नारिकेलफलम् & नारिकेलफलस्य अम्बु- नारिकेलफलाम्बु- both ष. तत्पुरुष स., गजभुक्तकपित्थवत्- like an elephant devoured wood- apple ('Kapitha') tree- गज- elephant, भुक्त- eaten- क. भू. धा. वि. of भुज्- भुनक्ति- भुंक्ते ७ ग. उ. प. to eat, devour, consume, कपित्थ- a wood- apple tree, गजेन भुक्तम्- गजभुक्तम्- तृ. तत्पुरुष स. & गजभुक्तः कपित्थः- गजभुक्तकपित्थः- विशेषणपूर्वपदकर्मधारय स.; आजगाम & निर्जगाम- both in परोक्ष भूत. प्र. पु. ए. व. of आ+ गम्- to become available, arrive & निर् (निस्)- गम्- depart, go away- (गम्- गच्छति १ ग. प. प. to go, leave), यदा-when, at which time- अव्यय

विदितं वै यथा सर्वं लोके वृत्तमिदं नृप।
विदिते चापि वक्तव्यं सुहृद्भिरनुरागतः ॥४१॥ -महाभा विराटपर्व ४. ५. ८

नृप, सुहृद्भिः इदम् सर्वम् वृत्तम् लोके विदिते च अपि, अनुरागतः वै, (तेभ्यः) यथा विदितम् वक्तव्यम् (कर्तव्यं भवति) ॥

Oh King, close friends, may know all this well, even then, due to love and affection, it is your duty to advise them properly.

नृप- Oh, King- पु. लिं. सं. वि. ए. व., सुहृद्भिः- पु. लिं. तृ. वि. ब. व. of सुहृद्- friend, well-wisher, अनुरागतः- with affection, love- अनुराग- love, affection, devotion, तः (तस्)- suffix implies quality, nature, इदम्- this, it, सर्वम्- all, entire, whole, वृत्तम्- behaviour, conduct, act, action- वृत्त- क. भू. धा. वि. of वृत्- वर्तते १ ग. आ. प. to behave, to be, to abide, विदितम्- adjctv- known, understood- विदित- क. भू. धा. वि. of विद्- वेत्ति २ ग. प. प. to know, understand- all in न. लिं. द्वि. वि. ए. व., वक्तव्यम् - to be told, said- वक्तव्य- (also वचनीय & वाच्य)- क. वि. धा. सा. वि. of वच्- वक्ति २ ग. प. प. to speak, say- in न. लिं. प्र. वि. ए. व; लोके & विदिते- both in स. वि. ए. व. of लोक- पु/न. लिं.-world & विदित-adjctv- known- (see above), अपि- also, even, and, यथा- like, in which case, वै- a particle of affirmation- indeed, surely, truly, च- and, एव- only, just, mere

ह्रीर्हता बाधते धर्मं धर्मो हन्ति हतः श्रियम् ।
श्रीर्हता पुरुषं हन्ति पुरुषस्याधनं वधः॥४२॥ -महाभा उद्योगपर्व ५.७१.२७

ह्रीः हता, धर्मम् बाधते। हतः धर्मः श्रियम् हन्ति। श्रीः हता पुरुषम् हन्ति । (तथा) पुरुषस्य अधनम् वधः (इव भवति) ॥

When one becomes shameless, his code of conduct (Dharma)is lost. Loss of Dharma causes the decline of wealth. The loss of wealth virtually kills the person, because poverty is as good as death to a man.

ह्रीः- shame, modesty, श्रीः- wealth, prosperity & हता- lost, destroyed, killed- हत- क. भू. धा. वि. of हन्- हन्ति २ ग. प. प. to strike, destroy, kill- all in स्त्री. लिं. प्र. वि. ए. व., धर्मः- right code of conduct, virtue (Dharma), हतः- see above & वधः- murder, slaughter, killing - (वध्-वधति- १ ग. प. प. to kill, slay)- all in पु. लिं. प्र. वि. ए. व., हन्ति & बाधते- both- वर्त. प्र. पु. ए. व. of हन्- see above & बाध्- १ ग. आ. प. to disturb, trouble, oppose, hurt, thwart, पुरुषस्य- पु. लिं. ष. वि. ए. व. of पुरुष- a man, a male, person, अधनम्- state of poverty, being without money, wealth- न. लिं. प्र. वि. ए. व.- धन- money, wealth- न धन- अधन- नञ् तत्पुरुष स., धर्मम्, श्रियम् & पुरुषम्- all in द्वि. वि. ए. व. of धर्म- श्री- & पुरुष- see above.

क्षिप्रं विजानाति चिरं शृणोति
विज्ञाय चार्थं भजते न कामात्।
नासम्पृष्टो व्युपयुङ्क्ते परार्थे
तत् प्रज्ञानं प्रथमं पण्डितस्य ॥४३॥ - महाभा. विदुरनीतिः

(ज्ञानी विषयम्) क्षिप्रम् विजानाति, चिरम् शृणोति च । स: विज्ञाय अर्थम् भजते, न कामात् (भजते)। परार्थे असम्पृष्टः न व्युपयुङ्क्ते । तद् पण्डितस्य प्रथमम् प्रज्ञानम् (अस्ति) ॥

A knowledgeable person comprehends a subject very quickly, but listens to it patiently for a long time. He attends to his work after knowing its objective, not because of his personal desire. He does not get involved in other's business unless specifically requested to do so. That is the foremost wisdom of an intelligent person.

विजानाति, शृणोति, भजते & व्युपयुङ्क्ते- all in वर्त. प्र. पु. ए. व. of वि+ज्ञा- to understand, know well- (ज्ञा- जानाति- जानीते ९ ग. उ. प. to know, understand), श्रु- ५ ग. प. प. to listen, hear, भज्- भजति- ते १ ग. उ. प. to serve, attend to, enjoy & व्युप (वि+ उप) + युज्- to indulge in, get involved or engaged- (युज्- युनक्ति- युङ्क्ते- ७ ग. उ. प. -deploy, use, connect, put to), अर्थः- purpose, duty, meaning & असम्पृष्टः- not particularly asked, not specifically questioned, -सम्पृष्ट -particularly asked, specifically questioned- क. भू. धा. वि. of सं+ प्रच्छ्- to question, interrogate- (प्रच्छ्- पृच्छति- ६ ग. प. प. to ask)- both in पु. लिं. प्र. वि. ए. व., विज्ञाय- after understanding, knowing- पू. का. वा. ल्यबन्त धा. सा. अव्यय of वि+ज्ञा- see above, कामात्- पं. वि. ए. व. of काम- desire, wish, परार्थे- स. वि. ए. व. of परार्थ- other's business, purpose, case, पण्डितस्य- पु. लिं. ष. वि. ए. व. of पण्डित- a knowledgeable person, expert, scholar, तद्- that, it, प्रज्ञानम्- intelligence, wisdom, प्रथमम्- first, primary- all in- न. लिं. प्र. वि. ए. व., क्षिप्रम्- quickly, immediately, speedily, चिरम्- for a long time, च- and, न- no, not- all अव्ययs

जले तैलं खले गुह्यं पात्रे दानं मनागपि ।
प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः ॥४४॥ -चाणक्यनीतिदर्पण अ. १४ श्लो. ५

जले तैलम्, खले गुह्यम्, पात्रे दानम् (तथा) प्राज्ञे शास्त्रम्, मनाक् अपि (कृतम्), वस्तुशक्तितः, स्वयम् विस्तारम् याति॥

Oil spilled on water surface, secret revealed to a bad person, charity towards a deserving person and knowledge given to an intelligent person, even in a small measure, spread widely on their own due to their inherent characteristics.

जले, खले, पात्रे & प्राज्ञे- all in स. वि. ए. व. of जलम्- न. लिं.- water, खलः- पु. लिं.- wicked or mischievous person, पात्र- पु/न. लिं.-fit, worthy, deserving, receptacle of any kind & प्राज्ञः- पु. लिं.- wise, intelligent, clever, तैलम्- oil, गुह्यम्- secret, to be hidden- गुह्य- (also गुहनीय & गुहितव्य)- क. वि. धा. सा. वि. of गुह्- गूहति-ते १ ग. उ. प. to hide, cover, keep secret, दानम्- a thing given in charity, donation & शास्त्रम्- science, scripture- all in- न. लिं. प्र. वि. ए. व., वस्तुशक्तितः- by virtue of its inherent characteristics- वस्तु- material, object, matter, शक्ति- strength, power, prowess- वस्तुना शक्तिः- वस्तुशक्तिः- तृ. तत्पुरुष स. & तः (तस्)- suffix implies quality, nature, विस्तारम्- द्वि. वि. ए. व. of याति- वर्त. प्र. पु. ए. व. of या- to go, to come to, विस्तार- spread, expansion, extension,

vastness- (वि+ स्तृ- to spread, diffuse, expand- स्तृ- स्तृणाति- स्तृणुते- ५ ग. उ. प. to spread, cover, strew), मनाक्- little, small quantity, slightly, अपि- even, also & स्वयम्- by oneself, of its own- all अव्ययs

आत्मोत्कर्षं न मार्गेत परेषां परिनिन्दया ।
स्वगुणैरेव मार्गेत विप्रकर्षं पृथग्जनात् ॥४५॥ -महाभारत- १२.२८७.२५

(मनुष्यः) परेषाम् परिनिन्दया आत्मोत्कर्षम् न मार्गेत। पृथग्जनात् स्वगुणैः एव विप्रकर्षम् मार्गेत॥

One should not seek to elevate oneself by criticizing others. One should strive to rise up above the people on the strength of his own qualities.

परेषाम्- पु. लिं. ष. वि. ब. व. of पर- other (person), परिनिन्दया- स्त्री. लिं. तृ. वि. ए. व. of परिनिन्दा- परि- अव्यय- excessive, very much, निन्दा- abuse, censure, blame, criticism, reproach- निन्दाम् परिकृत्य- परिनिन्दा- अव्ययीभाव स., आत्मोत्कर्षम् & विप्रकर्षम्- both in पु. लिं. द्वि. वि. ए. व. of आत्मोत्कर्षः - self elevation, rise, excellence, superiority of one's own- उत्कर्षम्- excellence, superiority - (उद्+ कृष्- to enhance, increase- कृष्- कर्षति १ ग. प. प. to draw, pull) & विप्रकर्षः- rise, progress, elevation, prosperity- (वि+ प्र+ कृष्- to rise, elevate), मार्गेत- आ. प. विध्यर्थ प्र.. पु. ए. व. of मार्ग्- मार्गति- १ ग. प. प. to seek, strive to attain, ask for, पृथग्जनात्- पु. लिं. पं. वि. ए. व. of पृथग्जन- different people, others- पृथक्- अव्यय- severally, different, separate- जन- people person- जनान् पृथग्कृत्य- पृथग्जन- अव्ययीभाव स., स्वगुणैः- पु/न. लिं. तृ. वि. ब. व. of स्वगुण- virtue or quality of one's own- स्व- one's own, self & गुण- virtue, quality, merit- स्वस्य गुणः- स्वगुणः- ष. तत्पुरुष स., एव- just, only, mere & न-no, not- both अव्ययs

सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति पण्डिताः ।

सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत् ॥४६॥ -चाणक्यनीतिदर्पण अ.४, श्लो.११

राजानः सकृत् जल्पन्ति। पण्डिताः सकृत् जल्पन्ति। कन्याः सकृत् प्रदीयन्ते। एतानि त्रीणि सकृत् सकृत् (भवन्ति) ॥

Kings give orders only once. The scholars speak only once. Daughters are given away (in marriage) only once. These three things happen only once.

राजानः & पण्डिताः- पु. लिं. प्र. वि. ब. व. of राजन्- King & पण्डित- learned, scholar, expert, कन्याः- स्त्री. लिं. प्र. वि. ब. व. of कन्या- daughter, girl, एतानि & त्रीणि- न. लिं. प्र. वि. ब. व. of एतद्- this, it & त्रि- three, जल्पन्ति- वर्त. प्र. पु. ब. व. of जल्प्- जल्पति १ ग..प. प. to speak, talk, utter, प्रदीयन्ते- कर्मणि प्रयोग प्र. पु. ब. व. of प्र+ दा- to give away, offer- (ददाति-दत्ते ३ ग. उ. प. to give, grant), सकृत्- अव्यय- only once, at one time, occasion

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥४७॥ -मम्मटाचार्यस्य काव्यप्रकाशः

काव्यम् यशसे, अर्थकृते, व्यवहारविदे, शिवेतरक्षतये, सद्यः परनिर्वृतये, कान्तासम्मिततया उपदेशयुजे (भवति) ॥

A poetical composition is written to be famous, to gain monetary benefits, to understand the practical aspects, to eliminate inauspicious things, for instant complete happiness and for an advice similar to that of a lovely woman.

काव्यम्- a poem, poetical composition- न. लिं. प्र. वि. ए. व., यशसे, अर्थकृते, व्यवहारविदे, शिवेतरक्षतये, परनिर्वृतये & उपदेशयुजे- all in च. वि. ए. व. of यशस्- न. लिं- fame, glory, renown, अर्थकृत्- for monetary benefit, earning money- अर्थ- money, wealth, purpose, कृत्- adjctv- generally at the end of composition implies- doer, maker- (कृत- done, accomplished- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, maker- अर्थम् कारयति इति- अर्थकृत्- उपपद तत्पुरुष स.), व्यवहारविद्- knower practical aspect, business- व्यवहार- business, established rule or practice, practical aspect, विद्- adjctv- generally at the end of composition implies- knowing, conversant with- विद्- वेत्ति २ ग. प. प. to know, understand- व्यवहारम् वेत्ति इति- व्यवहारविद्- उपपद तत्पुरुष स.), शिवेतरक्षति- destruction of things that inauspicious - शिव- auspicious, good, इतर- other, opposite of, क्षतिः- destruction, loss, reduction- शिवात् इतरम्- शिवेतरम्- पं. तत्पुरुष स. & शिवेतरस्य क्षतिः- शिवेतरक्षतिः- ष. तत्पुरुष स., परनिर्वृतिः- greatest satisfaction, joy- पर- adjctv- highest, greatest- निर्वृतिः- satisfaction, happiness- परा निर्वृतिः- परनिर्वृतिः- विशेषणपूर्वपद कर्मधारय स. & उपदेशयुज्- उपदेश- teaching, advice- युज्- adjctv- generally at the end of composition implies- application, use, join, direct- (युज्- युनक्ति- युंक्ते ७ ग. उ. प. to employ, use- उपदेशे योजयति इति- उपदेशयुज्- उपपद तत्पुरुष स.), कान्तासम्मिततया- स्त्री. लिं. तृ. वि. ए. व. of कान्तासम्मितता- like that of beloved, lovely woman- कान्ता- beloved, lovely woman- सम्मित- of equal measure, like, similar to- क. भू. धा. वि. of सं+मा- to be equal to- मा- माति- २ ग. प. प. to to measure, ता (तस्) suffix implies quality, सद्यः (सद्यस्)- instantly immediately, forthwith- अव्यय

वचस्तत्रैव वक्तव्यं यत्रौक्तं सफलं भवेत्।
स्थायीभवति चात्यन्तं रङ्गः शुक्लपटे यथा॥४८॥ -पञ्चतन्त्रम्

One should advise only in cases where it is going to be accepted, just like any color that sets very well on a white cloth.

यथा शुक्लपटे रङ्गः अत्यन्तम् च स्थायीभवति, (तथा) वचः तत्र एव वक्तव्यम् यत्र उक्तम् सफलम् भवेत्॥

शुक्लपटे- in पु/न. लिं. स. वि. ए. व. of शुक्लपट- शुक्ल- white, pure, bright, पट- piece of cloth, screen, plate- शुक्लः पटः- शुक्लपटः- समा. प्रादितत्पुरुष स., रङ्गः- colour, dye, paint- पु. लिं. प्र. वि. ए. व., वचः (वचस्)- speech word, advice, counsel, अत्यन्तम्- adjctv- very much, excessive, complete,

perfect, वक्तव्यम्- to be said, advised- (also वचनीय & वाच्य)- क. वि. धा. सा. वि. of वच्- वक्ति २ ग. प. प. to speak, say, उक्तम्- said, uttered- उक्त- क. भू. धा. वि. of वच्- to say, सफलम्- fruitful, successful- फलम्- fruit, result, effect- फलेन सहितम्- सफलम्- सहबहुव्रीही स. -all in न. लिं. प्र. वि. ए. व., भवेत्- विध्यर्थ तृ. पु. ए. व. of भू- भवति- १ ग. प. प. to be, to exist, become, स्थायीभवति- वर्त. प्र. पु. ए. व. of स्थायी-भू- to be lasting, enduring, permanent- (स्थायिन्- adjctv- lasting, enduring, permanent & भू- see above), यत्र- where, in which place, तत्र- there, in that place, एव- only, just, mere, यथा- like which, similar to, च , and- all अव्ययs

विधातृविहितं मार्गं न कश्चिदतिवर्तते।
कालमूलमिदं सर्वं भावाभावौ सुखासुखे॥४९॥ - महाभा आदिपर्व.१/२४७

न कश्चित् विधातृविहितम् मार्गम् अतिवर्तते। इदम् सर्वम् कालमूलम् भावाभावौ सुखासुखे (करोति) ॥

No one can ever deviate from the path fixed by his destiny. This all-pervading Supreme Spirit (destiny) is the root cause of existence and non-existence and happiness and sorrow.

कश्चित् (कः +चित्)- पु. लिं. प्र. वि. ए. व. of किम्+ चित्- someone, anyone, न कश्चित्- none, no one, विधातृविहितम्- decided by the creator- विधातृ- destiny, creator, fate, विहितम्- fixed, decided, arranged- विहित- क. भू. धा. वि. of वि+ हि- to decide, arrange, fix- (हि- हिनोति १ ग. प. प. to send forth, cast)- विधात्रा विहितम्- विधातृविहितम्- तृ. तत्पुरुष स. & मार्गम्- path, road- both in न. लिं. द्वि. वि. ए. व., अतिवर्तते- वर्त. प्र. पु. ए. व. of अति+ वृत्- to deviate, go beyond, transgress- (वृत्- वर्तते १ ग. आ. प. to be, to exist), इदम्-this, it, सर्वम्- all, entire, whole & कालमूलम्- originate in destiny- कालः- 'Time', the supreme spirit controlling the universe- मूलम्- root, base, instrumental- कालः मूलं यस्य - कालमूलम्-- बहुव्रीही स.- all in न. लिं. प्र. वि. ए. व., भावाभावौ & सुखासुखे- द्वि. वि. द्वि. व. of भावाभावः- पु. लिं- existence and non-existence- (भावः- being, existing, occurring- न भावः- अभावः- non-existing, non-occurring- भावः च अभावः च- भावाभावः- द्वंद्व स.) & सुखासुखम्- न. लिं.- happiness and unhappiness- सुखम्- joy, happiness- न सुखम्- असुखम्- unhappiness नञ् तत्पुरुष स.- सुखम् च असुखम् च- सुखासुखम्- द्वंद्व स., न-no, not

गृहस्थस्त्वेष धर्माणां सर्वेषां मूलमुच्यते।
यत्र पक्वकषायो हि दान्तः सर्वत्र सिध्यति॥५०॥ -- महाभा शान्तिपर्व १२.२४०.६

एषः गृहस्थः (आश्रमः) तु, सर्वेषाम् धर्माणाम् मूलम् उच्यते। यत्र (सः) पक्वकषायः दान्तः सर्वत्र हि सिध्यति॥

This married householder’s life is said to be foundation of all ways of living (or "of the four stages of life"). By fulfilling the householder's duties and enjoying worldly pleasures in a matured and controlled manner, he accomplishes success in every sphere of life.

एषः (एतद्)- this, he, गृहस्थः- householder, family man- गृहे तिष्ठति इति- गृहस्थः- उपपद तत्पुरुष स., पक्वकषायः -one who is matured and having control over worldly pleasures- पक्व- adjctv- ripe, mature, perfect, experienced, shrewd, कषायः- astringent flavour, worldly pleasures, passion- पक्वः कषायः यस्य सः- पक्वकषायः -बहुव्रीही स., दान्तः- liberal, generous, subdued, a donor- दान्त- क. भू. धा. वि. of दम्- दाम्यति ४ ग. प. प. to pacify, conquer, tame- all in पु. लिं. प्र. वि. ए. व., सिध्यति- वर्त. प्र. पु. ए. व. of सिध्- ४ ग. प. प. to accomplish, achieve, सर्वेषाम् & धर्माणाम्- पु/न. लिं. ष. वि. ब. व. of सर्व- all, entire, whole & धर्म- Way of living, Codes of conduct, 'Dharma', मूलम्- basis, root origin- न. लिं. प्र. वि. ए. व., उच्यते- कर्मणि प्रयोग प्र. पु. ए. व. of वच्-वक्ति (उवाच)- to say, speak, यत्र- where, in which place, case, सर्वत्र- everywhere, at all places, तु- but, on the other hand, हि- indeed, surely-all अव्ययs

श्रियः प्रदुग्धे विपदो रुणद्धि
यशांसि सूते मलिनं प्रमार्ष्टि
संस्कारशौचेन परं पुनीते
शुद्धा हि बुद्धिः किल कामधेनुः ॥५१॥ -सुभाषितरत्नभाण्डागारम्

शुद्धा बुद्धिः हि किल कामधेनुः (अस्ति)। (सा) श्रियः प्रदुग्धे, विपदः रुणद्धि, यशांसि सूते, मलिनम् प्रमार्ष्टि (तथा) संस्कारशौचेन परम् पुनीते॥

Indeed, pure knowledge is certainly the wish-fulfilling cow! It generates prosperity, prevents any mishaps, produces success, cleanses away all dirt and by perfection achieving (upbringing) rituals, makes others refined.

श्रियः & विपदः- both- स्त्री. लिं. द्वि. वि. ब. व. of -श्री- wealth, money, prosperity & विपद्- calamity, distress, trouble, मलिनम्- पु/न. लिं. द्वि. वि. ए. व. of मलिन- adjctv- dirty, polluted, unclean, impure, परम्- पु. लिं. द्वि. वि. ए. व. of परः- another person, यशांसि- न. लिं. द्वि. वि. ब. व. of यशस्- fame, success, प्रदुग्धे, रुणद्धि, सूते, प्रमार्ष्टि & पुनीते- all in वर्त. प्र. पु. ए. व. of प्र+ दुह्- well provide, yield well- (दुह्- दोग्धि- दुग्धे- २ ग. उ. प. प. to milk, yield, grant), रुध्- रुणद्धि- रुंद्धे ७ ग. उ. प. to stop, obstruct, check, सू- २ ग. आ. प. to produce, beget, yield, प्र+ मृज्- to wash off well, cleanse fully- (मृज्- मार्ष्टि २ ग. प. प. to clean, wash) & पू- पुनाति- पुनीते ९ ग. उ. प. to purify, cleanse, संस्कारशौचेन- न- तृ. वि. ए. व. of संस्कारशौच-Perfection achieved by proper upbringing संस्कार- refinement, perfection & शौच- purification, cleanliness- संस्कारेण शौचं - संस्कारशौचम्- तृ. तत्पुरुष स., शुद्धा- pure, refined, uncorrupted- शुद्ध- क. भू. धा. वि. of शुध्- शुध्यति ४ ग. प. प. to become pure, to be eligible, cleared, बुद्धिः- knowledge, intelligence & कामधेनुः- proverbial wish- fulfilling cow- काम- desire, wish, धेनुः- cow- कामं ददाति इति-उपपद स.- all in स्त्री. लिं. प्र. वि. ए. व., हि- surely, indeed, किल- indeed, certainly- both अव्ययs

ज्ञातयो वर्धनीयास्तैर्य इच्छन्त्यात्मनः शुभम् ।
कुलवृद्धिं च राजेन्द्र तस्मात्साधु समाचर ॥५२॥ -महाभा उद्योगपर्व ५.३९.१६

राजेन्द्र, ये आत्मनः शुभम् इच्छन्ति, तैः ज्ञातयः वर्धनीयाः (क्रियन्ते)। तस्मात् (त्वम्) कुलवृद्धिम् च साधु समाचर॥

Those who want good life for themselves, their relatives are also prospered by them. Therefore, Oh King, you conduct yourself to bring prosperity to your entire family.

राजेन्द्र- oh, King- in पु. लिं. सं. वि. ए. व.,- राजन्- King, इन्द्र- lord, master, राजसु इन्द्रः- राजेन्द्रः- स. तत्पुरुष स., ये, ज्ञातयः & वर्धनीयाः- all in- पु. लिं. प्र. वि. ब. व. of यद्- who, ज्ञातिः- kinsman, relative & वर्धनीय- (also वर्धितव्य & वृध्य) to be developed, prospered- क. वि. धा. सा. वि. of वृध्- वर्धते १ ग. आ. प. to grow, आत्मनः- in- पु. लिं. ष. वि. ए. व. of आत्मन्- self, one's own, soul, शुभम् & कुलवृद्धिम् - both in पु/न. लिं. द्वि. वि. ए. व. of शुभ- good, auspicious, wellfare & कुलवृद्धि- prosperity of the family- कुलम्- family, race & वृद्धिः- growth, development- (वृध्- वर्धते see above), इच्छन्ति- वर्त. प्र. पु. ब. व. of इष्- इच्छति ६ ग. प. प. to desire, want तैः- by them- in पु. लिं. तृ. वि. ब. व. of तद्- he, तस्मात्- therefore, from that- पु/न. लिं. पं. वि. ए. व. of तद्- that, it, समाचर- आज्ञार्थ द्वि. पु. ए. व. of सं+ आ+ चर्- to behave, conduct- (चर्- चरति १ ग. प. प. to walk, move), साधु- well, proper way & च - and- both अव्ययs

यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।

यस्याहं च द्वितीया स्याद् द्वितीया स्यामहं कथम् ॥

विहस्य - laughing, विहाय- without, in spite of, विहायस् -sky

How can I be द्वितीया (wife) of the person who thinks विहाय (without- अव्यय) is the चतुर्थी and विहस्य (ल्यबन्त of वि+हस्) is the षष्ठी of the word विहायस् (sky) and अहम् is the द्वितीया of अहम् ?